प्रवेश सं० १५९९५ विषयः धर्मशास्त्रम् क्रम सं०

नाम कालमाधव: सटीक: ग्रन्थकार माधवाचार्य:

पत्र सं० १-५७

श्लोक सं० —— अक्षर सं० (पंक्तौ) ५० पंक्ति सं० (पृष्ठे) ७

लिपिः दे.ना. आधारः का.

आकारः १०.२×४.

13916

वि० विवरणम् अपू. न. १६०७

पी० एम० यू० पा०——७७ एस० सी० ई०——१६५१——५० ०००

Indira Gandhi National Centre for the Arts

Indira Gandhi National
Centre for the Arts

श्रीगणेशायनमः नत्वागजाननंदेवमगजानन्दवर्द्धनं कालमाधवपद्यानि विवारिष्येयथामति विघ्नविघातायमंगलमाचरति
वागीशाद्याइति वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे यन्नत्वाकृतकृत्याःस्युस्तन्नमामिगजाननम् ।सुमनसोदेवाः
सर्वार्थानां सर्वपुरुषार्थसाधनानांउपक्रमे आरंभे इदानीम् यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ तस्यैतेकथिता
ह्यर्थाःप्रकाशंतेमहात्मनः इतिस्मरणाद्गुरुदेवतयोःस्मरणमाचरति सोहंप्राप्यविवेकतीर्थपदवीमाम्नायती
र्थेपरंमज्जन्सज्जनसंगतीर्थनिपुणःसद्वृत्ततीर्थंश्रयन् लब्धामाकलयन्प्रभावलहरींश्रीभारतीतीर्थतोविद्याती
र्थमुपाश्रयन्हृदिभजेश्रीकंठमव्याहतम् २ सोहंमाधवाचार्यनामा विवेकरूपस्यपदवींमार्गंप्राप्यहृदिअव्याह
तंश्रीकंठंमहादेवंभजे ध्यायामीत्यर्थः कीदृशोहं आम्नायोवेदस्तद्रूपेतीर्थेपरंकेवलंमज्जन्स्नानंकुर्वन् तदेक

परायणइत्यर्थः तथासज्जनसंगरूपेणनिपुणः निर्णीतशास्त्रतत्त्वः तथासद्वृत्तंसाधूनामाचरणंतदेवतीर्थंश्रयन्आ
श्रयन् तथाश्रीभारतीतीर्थतः एतन्नामकाद्गुरोःसकाशाल्लब्धांप्रभावलहरीं देवताप्रसादरूपांलहरीं आकलयन्प्रा
प्नुवन्नित्येकोर्थः भारतीरूपात्तीर्थाल्लब्धांप्रभावलहरीं पांडित्यरूपां आकलयन्नित्यपरः तथाविद्याब्रह्मविद्यातद्रू
पंतीर्थंउपाश्रयन् सेव्यमानइत्यर्थः एतस्यैवविद्यारण्यइतिनामप्रसिद्धं धर्मप्रवर्त्तकंस्वदेशोपतिंवर्णय
ति सत्येकव्रतपालकोद्विगुणधीस्थ्यर्थीचतुर्वेदितापंचस्कंधकृतीषडन्वयदृढःसप्तांगसर्वंसहः अष्टव्यक्तिकलाधरो
नवनिधिःपुष्यन्दशप्रत्ययःस्मार्त्तोऽद्भुतायधुरंधरोविजयतेश्रीबुक्कणक्ष्मापतिः सत्येकेति श्रीमान्बुक्कणनामाक्ष्माप
तिःविजयते कीदृशःसत्यरूपं यदेकंव्रतंतत्पालकः तथाद्विगुणधीरितरापेक्षयाद्विगुणबुद्धिमानित्यर्थः अ

Indira Gandhi National
Centre for the Arts

थवाद्वौगुणौसत्वरजोरूपौयस्यांतादृशीधीर्यस्यनतुतमोगुणशालिनीत्यर्थः तथात्रीन्धर्मार्थकामानर्थयतेप्रार्थय
तेनत्छीलः अथवातिस्रःप्रभावोत्साहमंत्रताःशक्तीरर्थयतेप्रार्थयतेतत्छीलः तथाचतुर्णांविद्यानांसामाद्युपा
यानांवाविदिताज्ञाता तथाच पंचसुस्कंधेषुतन्नामकेषुसहायादिपदार्थेषुकृतीकुशलः तदुक्तंनीतिशास्त्रेस
४ न हायाःसाधनोपायाविभागोदेशकालयोः विनिपातप्रतीकारःसिद्धिःपंचांगमिष्यतइति अस्यार्थःसहायास
जकार्येमंत्रिसेनिकाद्याः तथाकार्यस्यसाधनेउपायाःसामादयः तथादेशकालयोर्विभागोव्यवस्था यस्मिं
न्देशेयस्मिन्कालेअयमुपायइत्येवंरूपा तथाविनिपातस्यराष्ट्रोत्पातादिरूपस्यप्रतीकारःनिराकरणं त गो२
थासिद्धिःइष्टस्यलाभः एतेपंचस्कंधाःराज्यांगमित्यर्थः पुनःकीदृशोराजा षडन्वयदृढःषण्णांगुणानामन्व २

येनसंबंधेनदृढः अजयइत्यर्थः षण्णांशास्त्राणांइत्यर्थांतरं पुनःकीदृक् सप्तभिरंगैःसर्वसहनशीलः तानिचस्वाम्य
मात्यसुहृत्कोशराष्ट्रदुर्गबलानिचेतिनीतिशास्त्रोक्तानिज्ञेयानि तथाष्टौव्यक्ताःमूर्तयोयस्यतादृशस्यशिवस्य
कलायाअंशस्यधारकः ताश्चमूर्तयः जलाग्नियजमानचंद्रसूर्याकाशपृथ्वीवायुरूपाःआगमोक्ताःपुनः
कीदृक् नवनिधिः नवसंख्याकानिधयोयस्यतेचमहापद्मादयः प्रसिद्धाः नवानांरसानांनिधिरित्यर्थांतरं न
वोनूतनोनिधिरितिवा पुनःपुष्यद्दशाप्रत्ययः पुष्यतिवर्धमानादशायस्यतादृशः प्रत्ययोज्ञानंयस्यता
दृशः तथास्मार्तानांपाखंडिभिन्नानांशिष्टानांउत्सायस्यवृद्धेर्धुरंधरः तत्प्रवर्तकइत्यर्थः नन्वेतावतापित
वकुतोधर्मनिर्णयकरणेसामर्थ्यंतत्राह व्यासूढामिति व्यासूढानामिहतंत्रभेदानांज्ञाऊर्ध्वातीर्थमेकं

Indira Gandhi National
Centre for the Arts

...विद्यातीर्थप्रकृतिविमलंसद्विवेकोदयानां सर्वेषांतत्प्रथमसुखदंभारतीतीर्थमाद्यम्
ध्यावान्मेविपुलमनसोनिर्णयेशक्तिरस्तु ४ इहलोकेव्यामूढानांपुरुषार्थभूत्यानांतत्भूतोऽस्मा
शीरिणांजाह्नवी एकंकेवलंतीर्थंपुरुषार्थप्राप्त्युपायइत्यर्थः तथासद्विवेकोदयोयेषांतेषांपरिड
तानांविद्यारूपंतीर्थंअस्तीति शेषः कीदृक् प्रकृत्यैवविमलं तथासर्वेषांजनानांप्रथमतःसुखदं
भारतीरूपंतीर्थमाद्यं शिष्टाइतिशेषः भारतीतीर्थनामानंपूर्वोक्तं गुरुमित्यपरोऽर्थः तस्मिन्भावाद्
केवलात् विमलंशास्त्रयत्र्यंयस्यतादृशस्यममधर्मनिर्णयेशक्तिरस्तीत्यर्थः व्याख्यायमाध[redacted]वा
चार्योधर्मान्पाराशरानथ तदनुष्ठानकालस्यनिर्णयंकर्तुमुद्यतः व्याख्यायेति शिष्यावधानायव ३

क्ष्यंप्रतिज्ञायेत पाराशरान् पाराशरप्रोक्तान् एतेनकालनिर्णयस्यप्रयोजनंधर्मानुष्ठानयुक्तं व
क्ष्यमाणानुक्रमणस्यप्रयोजनमाह अर्थेति अर्थोनुक्रम्यतेश्लोकैरखिलोनिर्णीनीषितः तावतैवानु
तिष्ठासुर्निःसंदिग्धंप्रवर्ततां अनुक्रम्यतेसंक्षेपेणकथ्यते निर्णीनिषितः निर्णेतुमिष्टः तावतैवेति
अनुक्रमणमात्रादेवेत्यर्थः अनुतिष्ठासुअनुष्ठानंकर्तुमिच्छुः तथाच अनुष्ठानसौकर्यमनुक्रमणप्रयो
जनमित्यर्थः ननुवादिकृतविप्रतिपत्तौसन्देहात्कथंनिर्णयः तत्राह ततइति ततोमीमांसुचित्तस्यस
माधानायतस्तु नः विवरिष्येयथान्यायंश्रुतिस्मृतिवचोबलात् मीमांसाधर्मनिर्णयेच्छा तच्छीलं
मुस्यतस्यसमाधानायसंदेहनिरासाय ततःअनुक्रांतमर्थजातं यथान्यायं व्याख्यानुसारेण विव

Indira Gandhi National
Centre for the Arts

विस्तारपूर्वकं कथयिष्य इत्यर्थः पंचप्रकरणान्यत्रेतेषूपोद्घातवत्सरो प्रतिपत्क्लिष्टतिथयो नक्षत्रा
दिरितिक्रम : प्रकरणानि निरूपणीयार्थस्थानानि तेषु इति प्रक्रम इत्यन्वयः उपोद्घातः प्रक
तिसिद्धार्थचिंतनमेकं संवत्सरप्रकरणं द्वितीयं प्रतिपत्प्रकरणं तृतीयं अवशिष्ट[illegible]तिथिप्र
करणं चतुर्थं नक्षत्रादिप्रकरणं पंचमं इति क्रमेणेत्यर्थः उपोद्घातप्रकरणे वक्तव्यं दर्शयति उ
पोद्घात इति उपोद्घाते कालसत्वं तस्य निर्णययोग्यता ईश्वरो नित्यकालात्मा चिंतनीयः सकर्मसु का
लत्वं कालसाधनं तस्य कालस्य निर्णययोग्यता अब्दादिखंडकालस्य निर्णये योग्यत्वेपि नित्यका
लस्य कथं मनुष्ठानांगत्वं तत्राह ईश्वर इति ईश्वरस्य सर्वकर्मारंभे स्मरणविधानात्तस्यैव नित्यका राम ४

लात्मकत्वात्तदनुसंधानार्थं तन्निर्णय इत्यर्थः यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु न्यूनं
संपूर्णतां याति सद्यो वंदे तमच्युतमिति सर्वप्रारंभकार्येषु त्रयस्त्रिभुवनेश्वराः देवा दिशंतु नः
सिद्धिं ब्रह्मेशानजनार्दना इति जन्मकाले हि मुख्यत्वं उक्तमेतच्चतुष्टयं अब्दायनर्तुमासाश्च पक्षः
प्रकरणांतरे २० जन्य इति जन्मकालमध्ये हि मुख्यत्वं प्रधानत्वं आयनत्वादीनां तु तदवयवत्व
मित्यर्थः एवं चाह्नमारभ्यैव जन्यकालनिरूपणं युक्तमिति भावः प्रकरणांतरे संवत्सरप्रकरणे अ
१ चविधश्चा ब्दस्वधा[illegible]पंचेत्तोयव्रतादौ तिलकादिके सुजन्मादिव्रतेमौ रोगा समनादिषु सावनः स्मृत इति अब्दः

Indira Gandhi National
Centre for the Arts

संवत्सरः पंचविधः चांद्रः सौरः सावनः नाक्षत्रः वार्हस्पत्यश्चेति तत्र चान्द्रो नाम चांद्रद्वादशमासात्मकः
सौरो नाम सांक्रांतिघटितद्वादशमासात्मकः नक्षत्रो नाम नक्षत्रघटितद्वादशमासात्मकः सावनः त्रिंश
द्दिनात्मकद्वादशमासात्मकः वार्हस्पत्यो नाम बृहस्पतेरेकराशिभोगपर्यंतः तत्र चाद्यस्मिन्काद्रेव्रतेश्च
तत्र तिलकव्रतं भविष्योत्तरपुराणे वसंते किंशुकाशोकशोभिते प्रतिपत्तिथिः शुक्लातस्याप्रकुर्वी
तस्नानं नियममास्थितः ललाटपट्टे तिलकं कुर्याच्चन्दनपंकजं ततः प्रभृत्यनुदिनं तिलकालंकृतं
मुखं धार्यं संवत्सरं यावत् च्छशिनिवनमत्स्यलमिति अत्र शुक्लप्रतिपदमारभ्य विधानात् अत्र ५

प्रतिपदादिदर्शांतेचान्द्रमासंघटितं वर्षं सौरवर्षान्तु सौरेणासुजन्मादिशाम्पकचलक्षण धर्मोत्परेतत्कं मेष
संक्रांतेमरेणाभानो सोपवासो नम पूजयेद्भार्गवं देवं रामेश्वरं यथाविधि इत्यारभ्यमेषसंक्रमणे मत्स्ये याम्
देवं च पूजयेत् इत्यंतेन ग्रंथेन अतेचक्रे त्वाव्रतं संवत्सरमेतं दिष्टं मेषसंक्रांतियेक्षुनवाधिन्मत्युपसंहृते अत्र
त्रसंक्रांतिमारभ्य संवत्सरगणनात् सौरवर्षं ग्राह्यं तथा गोसतं गवायनाख्यं तत्र सावनः संवत्सरः सवषष्ठ्य
धिकशतत्रयदिनात्मकः त्रयोप्याचार्यसंवादो विकल्प्यते तानि तेछया आयुर्दायादिषु नाक्षत्रवार्हस्पत्याधिव
त्सरे १२ आचार्यसंवादात् आयाणामपि संवत्सराणां विकल्पेन न गृहणं आयुर्दायगणनायां नक्षत्रः सं
वत्सरो ग्राह्यः अधिवत्सरो नाम मध्यमानेन गुरुसंक्रांतिहीनाय श्वांद्रः संवत्सरः तत्र वार्हस्पत्यसंवत्सरो ग्रा

Indira Gandhi National
Centre for the Arts

द्यः अत्र चांद्रस्यावांतरभेदानाह चांद्राणामिति चांद्राणां प्रभवादीनां पंचके पंचके युगं संवत्सरादिरित्येवं तच्च
द्युपूर्वास्तु वत्सराः १३ चांद्राणां प्रभवादीनां पंचकपंचके युगे संघे प्रथमस्य संवत्सर इति द्वितीयस्य परिवत्सर इ
तृती ५६८ ति चतुर्थस्यानुवत्सर इति पंचमस्य इद्वत्सर इति संज्ञा एवं पंचसु जातेषु पुनर्द्वितीयवारे एता एव संज्ञा ज्ञे
या तथा च सैवैवत्ते संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः इडावत्सरस्तृतीय श्चतुर्थश्चानुवत्सरः इद्व
त्सरः पंचम एतत्संघो युगसंज्ञक इति एतेषां विनियोगो विष्णुधर्मोत्तरे संवत्सरे ब्राह्मणां तिलदानं
पचासी महाफलं परिपूर्वे तथा दानं द्विजानां द्विजसत्तम इडापूर्वे वस्त्राणां धान्यानां चानुपूर्वके इद्वत्सरे तथा राम
पि दानं प्रोक्तं महाफलमिति तिलदानं तिल इत्यादि तिलाय चावत्सरं [illegible] दीयते तत्र तु उग्रे उग्रकर्मणि सा ६

न्यवास्तीयेन दक्षिणोत्तरे १४ दक्षिणायनं कर्कादिस्मिन् तत्र यत् उग्रदेवतं कर्म तद् ग्राह्यं उत्तरायणं तु मकरादि
स्मिन् तत्र यत् सौम्यं कर्म तदुक्तं ज्योतिःशास्त्रसंहितायां मार्तण्डभैरववाराहनारसिंहास्त्रिविक्रमाः महिषासुरहं
ता च स्थाप्या वै दक्षिणायन इति उत्तरायणे सौम्यकर्मागत्वं स्मृतिनिषिद्धं उदगयनं स्याद् पूर्ण्यमासोत्पादो व
संताद्य ऋतवो द्विधा चांद्राः सौराश्च चान्तुकाः चैत्राद्या अथ मीनाद्या मेषाद्याश्च विवस्वतः वसंताद्य ऋतवो द्विधा चां
द्राः सौराश्च तत्र चांद्रमानेन चैत्रादिमासद्वयं वसंतः ज्येष्ठादिमासद्वयं ग्रीष्मः श्रावणभाद्रपदौ वर्षाः आ
श्विनकार्तिकौ शरत् मार्गपौषौ हेमंतः माघफाल्गुनौ शिशिरः तथा च श्रुतिः मधुश्च माधवश्च वासंतिका
एव ऋतु शुक्रश्च शुचिश्च ग्रैष्मावृतू नभश्च नभस्यश्च वार्षिकावृतू इषश्चोर्जश्च शारदावृतू सहश्च सहस्यश्च है

Indira Gandhi National
Centre for the Arts

मंतिकाहृत् नपस्वनपस्यश्चैशोशिरावृतुइति यद्यपिमासद्वयात्मकएवऋतुः२ तथापिद्विवचनेनदर्वयोव
मासद्वयाभिप्रायं मत्वाऽदिशाशश्चैत्रादिमासवचनाः अत्रचवसंतस्यप्राथम्यमुख्यं मुखंवाऋतवृत्तूनांयद्व
संतइतिश्रुतिवशादवगंतव्यं विवस्वतः सूर्यस्यसंबंधिनः सौराइत्यर्थः नेवमीनाद्याघोमेषाद्येतिविक
ल्पः तथाचश्रुतिः मीनमेषयोर्मेषवृषयोर्वावसंतइति अतनियोगस्तु वसंते शास्त्रेणाग्नीनादधीत त्यादि
श्रुत्योज्ञेयः एवंविष्णुधर्मोत्तरेषरतुअतुषट्यकथ्थकपरामूर्तिश्शाका तथाचवसंतेलाजाकुंलेपनादि
दानं ग्रीष्मेपानकादिदानमुक्तं देवीपुराणेवर्षासुतिलदानमुक्तं तथाविष्णुधर्मोत्तरे पूर्वशरद्यन्नदानमुक्तं राम्
हेमंतेवस्त्रादिनदानं शिशिरेवस्त्रदानमुक्तं वराहेतोग्निति तथावानादयस्तद्वत्यरामूर्तिव्रतपुस्तके अथ

---

मासोनिर्णीयते मासास्त्वस्याद्विना मासास्तु सावनः सौरश्चांद्रोनाक्षत्रइत्यमी १६ दर्शांतः पूर्णिमांतोवाचां
द्रोमोविश्वेवेशपयोः सौरोराज्ञः सावनस्तुयज्ञेष्योनिविपरः माघादिमासभेदेतिलदानादयः स्मृताइति १२
सावनस्त्रिंशदहोरात्रैःपरिमितोलोकव्यवहारप्रसिद्धः सूर्यस्यैकराशिभोगोयावत्कालंससौरः
अश्विन्यादिसप्तविंशतिनक्षत्रपरिवृत्तोनाक्षत्रः चांद्रः शुक्लादिदर्शांतः पूर्णिमांतश्चेतिद्विविधः त
दुक्तंब्रह्मसिद्धांते चांद्रः शुक्लादिदर्शांतः सावनः त्रिंशतादिनैः एकराशौरविर्यावत्कालंमासः सभास्क
रइति विष्णुधर्मोत्तरे सर्वर्क्षपरिवर्तैस्तुनाक्षत्रोमासउच्यतेइति एतेषांव्यवस्थामाह अस्रोविश्वेवेष्प
याशिति अस्रोचांद्रः विश्वेवेशपयोर्विहितकर्मणिग्राह्यइत्यर्थः राज्ञःकर्मणिसौरः सावनस्तुयज्ञेगवाम

Indira Gandhi National
Centre for the Arts

यनोरो त्रिंशाद्दिनात्मकस्यैवमासस्य ग्रहणात् ज्योतिषिके आयुर्दायविभागादोपयोगनाक्षत्र इत्यर्थः तदुक्तं ब्र
ह्मसिद्धांते अमावास्यापरिच्छिन्नो मासः स्याच्चांद्रमसस्तु संक्रांतिपौर्णमासीभ्यां यथैव नक्षत्रपर्यायादि
ति रक्षांतानां पौर्णमांतानां च मासविशेषाणां चैत्रादिसंज्ञा नक्षत्रप्रयुक्ता तदुक्तं संकर्षणकांडे द्वे द्वे वि
त्रादिताराणां परिपूर्णेंदुसंगमे २ मासाश्चैत्रादयो ज्ञेयास्त्रिके षष्ठान्त्यसप्तमाद् इति परिपूर्णेंदुसंगमेस्य
संबंधि पूर्णमास्यां चित्रादिताराणां द्वे द्वे भवत इति शेषः तमासाश्चैत्रवैशाखादिसंज्ञा इत्यर्थः यस्मिन्मा
से पूर्णिमा चित्रास्वात्योरन्यतरेण युज्यते स चैत्रः एवं वैशाखादयो विशाखादिनक्षत्रयोगेन ज्ञेयाः षष्ठो
भाद्रपदः त्रिके उत्तरे तोका पूर्वाभाद्रपदा उत्तराभाद्रपदा रेवत्याख्यत्रिभिः पूर्णिमायोगे सप्तम आश्विनः रेवत्या राम०

१४

दिविक योगे अंत्यः फाल्गुनः आदि त्रिक योग इत्यर्थः सौरादिमासत्रयस्य मध्ये कस्यचित्कस्यचिन्मासस्य ज्योतिषे
थ उक्तं सौरो मासो विवाहादौ यज्ञादौ सावनः स्मृतः आब्दिके पितृकार्ये च चांद्रो मासः प्रशस्यत इति मास
मासं निरूपयति चंद्र इति चांद्र संक्रांतः सोंतर्भवति चोत्तरे इति तदुक्तं ब्रह्मसिद्धांते चांद्रो मासो
ह्यसंक्रांतो मलमासः प्रकीर्तित इति अयमर्थः शुक्लप्रतिपदादि दर्शांतः चांद्रो मासः तन्मध्ये रविसंक्रा
त्यभावे मलमासो भवति तथा च चतुर्दश्यां अमायां वा रविसंक्रमणे ततः शुक्लप्रतिपदामारभ्य दर्शांत
मासमतिक्रम्य प्रतिपदायां रविसंक्रमणे तत्रासंक्रांतो मलमाससंज्ञकमिति मलत्वं च कालाधिक्या
त् तथा च गृह्यपरिशिष्टे मलं वदंति कालस्य मासं कालविदोधिकमिति कालाधिक्यं चाविष्णुधर्मोत्तर

Indira Gandhi National
Centre for the Arts

दर्शितं सौरचान्द्रमानेन यदा भवति मार्गे वा श्रावणे तु न तदा मानेन दिनषट्केन पूर्यते दिनरात्रिश्चैतेषाम्
ग्रो क्रांसंवत्सरेणाष्ट सौरसंवत्सरस्यांते मानेन त्रांशितेन तु एकादशानि रिच्यंते दिनानि भृगुनंदन वर्ष
द्वये सार्द्धमासे तस्मान्मासोऽतिरिच्यते सचाधिमासकः प्रोक्तः काम्यकर्मसु गर्हितइति सौरसंवत्सरः षड्भि
र्दिनैः सावनादतिरिच्यते एकादशभिर्दिनैश्चांद्रादतिरिच्यते तथाच चांद्रसंवत्सरद्वयात्सौरसंवत्सरद्व
यं द्वाविंशत्यादिदिनैरधिकं भवति अतस्तु ऊर्द्धं सौरमासाष्टकं चांद्रान्मासाष्टकात्सार्द्धैः सप्तभिर्दिनैरतिरि
च्यते तथाच मिलित्वा दिनार्द्धन्यूनो मासो भवति सोऽयमधिको मास इति अवशिष्टदिनार्द्धपूरणाय च
थोक्तकालादूर्द्धं षोडशभिर्दिनैः संपद्यते अत एव सिद्धांतेऽभिहितं द्वात्रिंशद्भिर्दिनैर्मासैर्दिनैः षोडशभिः एमु

भिस्तथा घटिकानां चतुष्कपतति ह्यधिमासकइति यस्मिन्मासे न संक्रांतिः संक्रांतिद्वयमेव वा मलमासः स वि
ज्ञेयो मासे त्रिंशत्तमे भवेदिति काठकवचनं तु ज्योतिःशास्त्रप्रसिद्धस्फुटमानाभिप्रायं द्वात्रिंशद्भिरिति वचनं तु म
ध्यमनामाभिप्रायमिति न विरोधः यद्यपि द्वात्रिंशन्मासेषु योऽधिको मासः स शुक्लप्रतिपदादिदर्शांतत्वाभा
वात् श्रौतस्मार्त्तकर्मानुपयुक्तः इन्द्राग्नी यत्र हूयेते मासादिः स प्रकीर्तितः अग्नीषोमौ स्थितौ मध्ये समासौ
पितृसोमकौ तमतिक्रम्य तु यदा रविर्गच्छेत्कदाचन आद्यो मलिम्लुचो ज्ञेयो द्वितीयः प्राकृतः स्मृतः अय
मर्थः दर्शपूर्णमासयाजिना शुक्लप्रतिप्रतिपदादि दर्शेष्टिदेवाविंद्राग्नी हूयेते कृष्णप्रतिपादि तु पूर्णिमा
सेष्टिदेवावग्नीषोमौ अमावास्यायां पिंडपितृयज्ञदेवौ सोमपितरौ तत्रैवं सति शुक्लप्रतिपदि दर्शांतो मा

Indira Gandhi National
Centre for the Arts

सः संक्रांतिरहितोऽधिमास इत्यर्थाल्लभ्यत इति तस्मान्मध्यममानगणनाश्रौतस्मार्त्तयोर्नोपयुक्ता दर्शांत
द्वात्रिंशन्मासोत्तरं षोडशदिने गते शुक्लद्वितीयायां मलमासोपक्रमात्तथापि लाभाधिक्यमोऽत्रेत दुदा
हरणं त्रिंशन्मे भवेदितितु धर्मशास्त्रोपयोगी निबोधं यद्यपि न्यूनाधिकसंख्यया अपिदर्शनान्नत्रिंश
त्त्वनियमः तथापि त्रिंशत्तमत्वोपलक्षणत्वान्नदोषः सोंत भवतीति उत्तरमासशेष इत्यर्थः तथा वड्यो
तिषे षष्ट्या तु दिवसैर्मासैः कथितो बादरायणैः पूर्वमर्द्धं परित्यज्य कर्त्तव्या वोत्तरे क्रिया इति तथा आद्यो
मलिम्लुचो ज्ञेयो द्वितीयः प्राकृतः स्मृत इति एवं शुक्लप्रतिपदमारभ्य अग्निमदर्शपर्यंतं न संक्रांतिः किं राम:
तु तदुत्तरस्तदुत्तरप्रतिपदि द्वितीयायां वा मेषसंक्रांतिः तत्र यदा पूर्णिमांते वेन कृष्णचतुर्द्दश्यां दर्शं वा मान १०

संक्रांतिस्तत्र च शुक्लप्रतिपदादिदर्शांतश्चैत्रोऽसंक्रांतः मलमास इति अधिमास इति वा ख्यायते एवं वैशा
खादिष्वपि ज्ञेयं असंक्रांतावेकवर्षे द्वौ वे सं[illegible] आदिमः क्षयमासो द्विसंक्रांतः स वांहस्पतिसंज्ञकः असं
क्रांतावितिएकस्मिन्वर्षे द्वावसंक्रांतौ भवतः तदा तयोर्मध्ये आदिमः प्रथमः संसर्पसंज्ञकः तत्र द्वयोरसं
क्रांतयोर्मध्ये संक्रांतिद्वयमुक्तः सच क्षयमाससंज्ञकः अंहस्पतिसंज्ञकश्च भवति एवं कार्त्तिकादिमासत्र
ये पक्षयमासो नान्यत्र तदुत्तरं चापरोऽसंक्रांतो भवति अत्र द्विसंक्रांतियुक्तस्य क्षयसंज्ञायां हेतुरुच्य
ते यदा धनुस्थे रवौ दर्शसमाप्तिस्तदा तस्य मेषादिस्थे सवितरि यो यो मासः स पूर्यते चांद्रः वैचाधः संज्ञय
इति वचनेन मार्गशीर्षत्वं प्राप्तं तदा एकस्मिन्नेव मासे शुक्लप्रतिपदादिधनुः संक्रांतिं न तदुर्द्धं दर्शमक

Indira Gandhi National
Centre for the Arts

मासोमकरस्थेतुसमाप्ते : अतःपोषमा

रसंक्रांतिमासोद्विसंक्रांतिक्षयाख्यः तत्रधनुस्थेरवौदर्शांतिम

सत्वंसंपन्नं तथाचमार्गशीर्षस्यतत्रजुगमत्वात् क्षयसंज्ञातस्ययुक्तेति तदुक्तंज्योतिषे असंक्रांतिमा

सोधिमासःस्फुटःस्याद्विसंक्रांतिमासःक्षयाख्यःकदाचित् क्षयःकार्तिकादित्रयेनान्यतःस्यात्तदाव

र्षमध्येधिमासद्वयंचभवेत् यदामांतमानेनभाद्रपदामावास्यायांकन्यासंक्रांतिस्तदूर्ध्वमसंक्रांतमेकं

मासमतीत्यानंतरयोर्मासयोःक्रमेणतुलासंक्रांतीभवतस्ततउर्ध्वमेकस्मिन्नेवमासिशुक्लप्रतिपदिध

नुःसंक्रांतिः तदनंतरंदर्शेमकरसंक्रांतिःसक्षयमासस्ततऊर्ध्वंकुंभसंक्रांतिरमावास्यायां ततऊर्ध्वमेक

संक्रांतमासमतीत्यशुक्लप्रतिपदिमीनसंक्रांतिः एवंसतिएकस्मिन्नेववत्सरेद्वावसंक्रांतौमासौ एक ए.मः ८

अमध्येद्विसंक्रांतमासइतियथोक्तमासत्रयसंपत्तिर्बोध्याः त्रयस्त्याज्याविवाहादौसंसर्पांहस्पतीउभौ शुद्धौश्चो

नेतथास्यात्तेमलमासाविविर्ज्यते त्रयस्त्याज्याइति विवाहादौशुभकार्येत्रयोप्येतेवर्जनीयाइति तदुक्तंज्यो

तिषे यस्मिन्मासेनसंक्रांतिःसंक्रांतिद्वयमेववा संसर्पांहस्पतीमासावधिमासाश्चनिंदिताइति तत्रावि

विशेषमाहसंसर्पेति ससर्पःप्रथमासांक्रांतःअंहस्पतिःक्षयमासः एतौद्वौश्चौतेस्मान्नैवकर्मणिशुद्धौ

ग्राह्याविल्यर्थः तदुक्तं मासद्वयेद्वमध्येतुसंक्रांतिर्नयदाभवेदिति प्राकृतस्तत्रपूर्वस्यादधिमासस्तथोत्तर

इति प्राकृतःशुद्धः अतएवसम्यक्सर्पतिकर्मस्थितियोगात्संसर्पसंज्ञा एवंक्षयमासोपि तत्रप्राकृतस्य

कर्मणोन्यत्रासंभवात्तत्रकर्मणिश्राद्धादौशुद्धस्तनतुक्षयमासे एकमासलोपात्कथंतत्प्रयुक्तकर्मानु

ष्टानं कथं द्वादश मासाः संवत्सर इत्ययं नियम इति चेत् उच्यते तदा वचनांतरं द्विसंक्रांतीक्षयः स्यात्स ए
कोपि द्व्यात्मकः यत्र मासि रविसंक्रमद्वयं तत्र मासियुगलक्षयाक्रयमिति मासद्व्यात्मकं एकस्यैव क्ष
योच्यते भवेदिति तत्रैव व्यवस्थोक्ता तिथ्यर्धे प्रथमो पूर्वो द्वितीयेर्द्धे तदुत्तर मासाविति बुधैश्चिंत्यौ क्ष
यमासस्य मध्यगाविति इदानीं मलमासे कार्याकार्यनिर्णयः क्रियते काम्यारंभमित्यादिना काम्यारं
भं तत्समाप्तिं मलमासे विवर्जयेत् आरब्धं मलमासात्प्राक् कृच्छ्रचांद्रादिकं तु यत् तत्समाप्यं सावन
स्य मासस्यानतिलंघनात् इति अत एव पैठीनसि श्रौतस्मार्तक्रियाः सर्वाः द्वादशे मासि कीर्तिताः त्रयोद
शे तु सर्वास्ता निष्फलाः परिकीर्तिताः स्मृत्यंतरेपि इष्ट्यादि सर्वकाम्यं तु मलमासे विवर्जयेदिति अयं राम: १२

वनिषेध आरंभसमाप्तिविषयः असर्पानामपि मासानां तेषु समसंमता व्रतानां चैव यज्ञानां आरंभश्च
समाप्तय इति पूर्वमारब्धं तु कृच्छ्रादि मलमासेपि समापनीयमित्याह आरब्धमिति अत्र हेतुमाह सावन
स्येति द्वादशाहोरात्रमितत्वात् कृच्छ्रस्य मध्ये विरामायोगादिति भावः आरंभसमाप्त्योर्मध्यपातित्वाधिमा॰
सोपि कर्मकार्यमित्याह आरंभस्येति आरंभस्य समाप्तेश्च मध्यस्याधिमलिम्लुचः आरब्धमखिलं का
र्यं तदानुष्ठेयमेव च तथा च स्मृतिः अधिमासनिपातेपि होमयज्ञविधिक्रम इति काम्यस्यापि क्व
चित्कर्तव्यतामाह कारीर्यादिषु यत्काम्यं तस्यारंभसमापने कार्यकालविलंबस्य प्रतीक्षाया अस
भवात् अनन्यगतिकं नित्यं अग्निहोत्रादि न त्यजेत् कारीर्यादिति कारीर्या वृष्टिकामो यजेतेति वि

Indira Gandhi National
Centre for the Arts

हिताकारीरीसंज्ञकेष्टिस्तदारंभसमापनेमलमासेपिकर्त्तव्येशुद्धमासप्रतीक्षायांक्षेत्रशुष्कताप्रसंगात्
अतएवकाठकगृह्ये मलमासेनन्यगतिंकुर्यान्नित्यान्नैमित्तिकीक्रियामिति नित्याग्निहोत्रादिर्
नैमित्तिकीग्रहणस्नानादिक्रिया तदुक्तं गृह्यपरिशिष्टे अवषट्कार होमाश्चपर्वचाग्रयणंतथा मल
मासेपिकर्त्तव्याकाम्याइष्टीर्विवर्जयेत् अवषट्कारहोमा अग्निहोत्रोपासनवैश्वदेवादयः पर्वदर्शपूर्ण
मासौपार्वणस्थालीपाकश्चदर्शादीनांनित्यत्वमकरणप्रत्यवायादवगंतव्यं नित्येतिपूर्वोक्तकाम्यस्या
प्युपलक्षणं अनन्यगतिकस्यतुल्यत्वात् अनन्यगतिकानैमित्तिकान्याहयमः चंद्रसूर्यग्रहणे
स्नानंश्राद्धदानजपादिकं कार्याणिमलमासेपिनित्यंनैमित्तिकंतथेति एवंसतिसगतिनित्यनैमि राम १२

त्तिकमेववर्जनीयमित्याह गत्यंतरयुतंनित्यंसोमयागादिवर्जयेत् अगतिग्रहणंस्नानंजातेष्टिर्गतिसंयुता
द्वयंनैमित्तिकंतस्यअवस्थानित्यवन्मता गत्यंतरयुतमिति सोमयागोहिवसंतेविहितः वसंतश्चमलमा
सवर्जनेपिशुद्धमासेसंभवतीतिसगतिकत्वं तथाचकाठकगृह्ये सोमयागादिकर्माणिनित्यान्यपि
मलिम्लुचे षष्ठीड्याग्रहणाधानचातुर्मास्यादिकान्यपि महालयाष्टकाश्राद्धोपाकर्माद्यपिकर्मयत्
स्पष्टमासविशेषाख्याविहितंवर्जयेन्मले इति षष्ठीष्टिःकाठकशाखादौप्रसिद्धा जातेष्टिर्गतिसंयुते
ति जातेष्टिर्जननानंतरंविहिता जातकर्मानंतरंचस्तनप्राशनं ततःपूर्वं एवंचप्रथमंजातेष्टिस्ततोजा
तकर्मततस्तनप्राशनमितिबालविपत्तिप्रसक्तिशंकास्यादतःशोधविरोधाज्जातेष्टिर्जातकर्मानंतरंभव

Indira Gandhi National
Centre for the Arts

ति एवंचनिमित्तानंतर्यबाधस्या विशेषादाशौचापगमेनकार्या एवंचपर्वकालानुग्रहार्थंतत्प्रतीक्षा
पि तथाशुद्धमासप्रतीक्षयापिक्रियमाणानदुष्यंतीतिसंगतिकत्वंद्रष्टव्यं आग्रयणस्यपुरणान्त
लाभेसंगतिकत्वंतल्लाभेजातिकत्वं नित्यवदिति तथानित्यमगतिकंवाकार्यंसगतिकंनकार्यं तथा
नैमित्तिकमपीत्यर्थः एवंच आवश्यकंकाम्यमनन्यगतिकं नित्यनैमित्तिकेमलमासेकार्यं नेतरानी
तिवर्ज्यावर्ज्यविवेकःसंपन्नः तत्रकार्याणिकालादर्शोक्तानि द्वादशाहसपिंडीकर्मग्रहणजन्मनोः
सीमंतेपुंसवेश्राद्धंद्वावेतोजातकर्मच श्राद्धंनांदीश्राद्धंद्वावेतोसीमंतपुंसवो रोगेश्या निरलभ्येचया
मश्राद्धंव्रतानिच प्रायश्चित्तनिमित्तस्यलब्धस्तूर्ध्वपरत्रच अष्टोदर्भमन्वादिमहालययुगादिषु

रा.म: ५४

---

मन्वादिषुचयद्दानंदानंदेनंदिनंचयत् तिलगोभूहिरण्यानांमध्येउपासनयोः क्रिया पर्वहोमश्चाग्रयणं
साग्निरिष्टिश्चपर्वणोः नित्याग्निहोत्रहोमश्चदेवतातिथिपूजनं स्नानंचस्नानविधिनाप्यभक्ष्यापेयवर्जनं
तर्पणंनिमित्तस्यनित्यत्वादुभयत्रच अनित्यमनिमित्तंचदानंचमहदादिकं महादिदकंषोडशाम
हादानादि अग्न्याधानाध्वराष्पूर्वतीर्थयात्रामरेक्षणं देवारामतडागादिप्रतिष्ठामौंजिवंधनं आश्रम
स्वीकृतिःकाम्यवृषोत्सर्गश्चनिष्क्रमः राज्याभिषेकप्रथमचूडाकर्मव्रतानिच अन्नप्राशनमारंभोगृ
हाणांचप्रवेशनं स्नानंविवाहानामातिपन्नंदेवमहोत्सवं भ्रंव्रतारंभसमाप्तिंचकाम्याकाम्यंचया
यनां प्रायश्चित्तंतुसर्वस्यमलमासेविवर्जयेत् उपाकर्मोत्सर्जनंचपवित्रदमनार्पणं अवरोहश्च

Indira Gandhi National
Centre for the Arts

हेमंतःसर्पाणांवलिरष्टकाःईशानस्यवलिर्विलाःआयनंपरिवर्त्तनंदुर्गेंद्रस्थापनोत्थानेचजोत्थौववग्नि
णःपूर्वत्रप्रतिषिद्धानिपरस्त्राण्यत्रैदैविकंमिति अत्रद्वादश्याइत्यारभ्यनित्यत्वादुभयत्रचेत्यंतेनग्रंथेनक
र्मसंग्रहः अनित्यमनिमित्तंचेत्यारभ्यवर्जयेदित्यंतेनवर्ज्यसंग्रहः उपाकर्मेत्यारभ्यपरस्त्राण्यत्रैदैविक
मित्यंतेनमलमासवर्जितानांसतांशुद्धमासेअवश्यंकर्त्तव्यत्वेनसंग्रहः अत्रसर्वत्रसाक्षिवचनान्युदाहृ
रामः यमगर्भेवार्धुषिकवृद्धेश्राद्धकर्मणिमासिके सपिंडीकरणेनित्येनाधिमासंविवर्जयेत् तीर्थस्नानं
जपोहोमोयवव्रीहितिलादिभिः जातकर्मांत्यकर्माणिनवश्राद्धंतथैवच मघात्रयोदशीश्राद्धान्यपि
षोडशवा चंद्रसूर्यग्रहेस्नानंश्राद्धदानजपादिकं कार्याणिमलमासेपिनित्यंनैमित्तिकंतथेति मासि। राम २५

केश्राद्धकर्मणिअमावास्याश्राद्धकर्मणीत्यर्थः नित्यनित्यदाने होमोत्रौपासनहोमः अंत्यकर्माणिदहनो
दकपिंडदानास्थिसंचयनादीनि स्मृत्यंतरे श्राद्धजातकनामानियेचसंस्कारसव्रताः मलिम्लुचेपिकर्त
व्याइष्टीःकाम्याश्चवर्जयेदिति संस्काराअन्नप्राशननिष्क्रमणादयःसव्रताश्चातुर्मास्यादयः गभस्तिः
एकोद्दिष्टंतुयच्छ्राद्धंतन्नैमित्तिकमुच्यते तत्कार्यंपूर्वमासेचकालाधिक्येचधर्मतइति मरीचिः रोग
वालभ्ययोगावसीमंतेपुंसवेपिच यद्दशाति समुद्दिष्टंपूर्वत्रापिनदुष्यतीति ननुसंग्रहेमहालयश्रा
द्धस्यापिकर्त्तव्यतोक्ताःसावचनांतरविरुद्धा महालयाष्टकाश्राद्धोपाकर्माद्यपिकर्मयत् स्पष्टमा
सविशेषाख्याविहितंवर्जयेन्मलइतिनिषेधात् नागरखंडेपि नभोवाथनभस्योवामलमासोय

Indira Gandhi National
Centre for the Arts

दाभेव सप्तमः पितृपक्षः स्यादन्यत्रैव तु पंचमइति अत्रसप्तमपंचमौ आषाढीमवधिंकृत्वा द्रष्टव्यौ ना
पंदोषः तत्र महालयश्राद्धे न तीर्थविशेषस्य विवक्षितत्वात् शुद्धमासमृतानां स्यात् मलिने प्रथमाब्दिकं म ९२
मलमासमृतानां तु मलिस्यादाब्दिकांतरं शुद्धमासमृतानामिति तथावहारीतः असंक्रांते हि कर्त
व्यमाब्दिकं प्रथमं द्विजैरिति तथा प्रत्यब्दं द्वादशे मासि कार्या पिंडक्रिया मृतेः क्वचित्त्रयोदशेप्युक्ता आ
द्यंमुक्त्वानुवत्सरमिति अत्र द्वादशे मासि पूर्णे सति अनंतरदिने कार्यमिति व्याख्येयं एवं त्रयोद
शाद्युक्त्यत्रापि आब्दिकतिथौ द्वितीयवर्षादावेव संभवात् मासपक्षतिथिस्पृष्टे यो यस्मिन्म्रियतेऽह एमः
नि प्रत्यब्दं तु तथाभूतं क्षयाहं तस्य तं विदुरिति व्यासवचना तस्माच्छुद्धमासमृतानां प्रथमाब्दिकं म २६

लएवकार्यं द्वितीयाब्दिकं तु शुद्ध एवेति व्यवस्थयोभयत्र कर्त्तव्यता एषा मलमासमृतानां तु यदि कदाचित्स
एव मलमास आगतस्तदा तत्रैव प्रत्याब्दिकं मलमासे कर्त्तव्यं न तूपरितने शुद्धमासे तथा च भृगुः मलमास
मृतानां तु यच्छ्राद्धं प्रतिवत्सरं मलमासे तु तत्कार्यं नान्येषां तु कदाचनेति तथा मलमासमृतानां तु सौरं
मानं समाश्रयेत् स एव दिवसस्तस्य श्राद्धपिंडोदकादिषु इति तदेव मलमास एव कार्यं यथा शुद्धमास
मृतानां प्रथमाब्दिकं मलमासमृतानामाब्दिकांतरं च ईदृशं किंतु शुद्ध एव यथोपाकर्मादि सामगातिरि
क्तानां सामगानां तु मलेऽपि सिंहस्थे रवौ न द्विधानात् सिंहस्थे रवौ तु पुष्यर्क्षे पूर्वाह्णे विचरेद्द्विजः छांदोगा
मिलिताः कुर्युरुत्सर्गं सर्वे दृष्ट्वा शुक्लपक्षे तु हस्तेन त्वपाकर्मापराह्णिकमिति गार्ग्यवचनात् प्रथ

सोपाकरणांतुतेषामपिमलेनिषिद्धं प्रथमोपाकृतिर्नस्यात्कृतंकृतंकर्मविनाशकृदितिवचनात् एवंचद
शहरासुनेनात्कर्षयत्तुपपितृणादिषु उपाकर्ममहाषष्ठ्योर्हितदुक्तंस्मृत्यादितइतिवचनेनतउपाकर्मणो
नुकर्षाभिधानंसामगविषयमेवज्ञेयं ग्रहमनुसरामः किंचिदुभयत्रापिकार्यं यथाशादकुंभादि
किंचिदन्यतरस्मिन्निमित्तवशात्कर्तव्यं यथाशादश्राद्धसपिंडीकरणादि किंचिन्मलमासेवर्ज्यं य
था अनित्यमनिमित्तंचेत्यादीतिसंक्षेपः देवमुख्यःशुक्लपक्षःकृष्णःपित्र्येविशिष्यते देवइति
देवयागादिकर्मणिशुक्लपक्षपक्षःप्रशस्तः यंकामयेतवसीयान्स्यादिति तंपूर्वपक्षेयाजयेत्— रामः
वसीयानेवभवतीतिश्रुतेः वसीयान्वसुमत्तरः पित्र्यकर्मणितुकृष्णपक्षःप्रशस्तः यथाचेवापरःपक्षः ७

पूर्वपक्षाद्विशिष्यते तथाश्राद्धस्यपूर्वाह्णादपराह्णोविशिष्यतइतिमनुवचनात् इतिसंवत्सरप्रकरणे
अथप्रतिपत्प्रकरणमारभ्यतइत्याह तृतीयेतुप्रकरणेइति तृतीयेतुप्रकरणेवर्णनायप्रतिपत्ति-
थिः प्रतिपन्नामविज्ञेयाचंद्रस्यप्रथमाकला कथमकलानिष्पत्तिपरिमितःकालःप्रतिपत्तिथि
र्भवति एवंद्वितीयादिष्वपिद्रष्टव्यं तथाचस्कांदे अमाषोडशभागेनदेविप्रोक्तामहाकला संस्थि
तापरमामायादेहिनांदेहधारिणी अमादिपौर्णमास्यंतायाएवशशिनःकलाः तिथयस्तास
माख्याषोडशैवचसंस्तुतइति अयमर्थः यामहामायाआधारशक्तिरूपादेहिनांदेहधारिणीसं-
स्थितासाचंद्रमंडलस्यषोडशभागेनपरिमिताचंद्रदेहधारिणीअमानाम्नीमहाकलेतिप्रोक्ता

Indira Gandhi National
Centre for the Arts

क्षयोदयरहिता नित्या तिथिसंज्ञकैव इतरादपि पंचदशाकलादिवसव्यवहारोपयोगिन्यः क्षयोदयव
त्यः पंचदशा तिथयो भवंतीति तिथयः षोडशैवेत्यभिप्रायं वचनमिति शुक्लपक्षइति शुक्लपक्षे वि
वाश्चंद्रं कृष्णपक्षे विनिःसरत् वह्निनापीतान्प्रतिपत्कला शुक्लपक्षे चंद्रं पुनः प्रविशति कृष्णपक्षे च
तत्तो निःसरति वह्न्यादिदेवतानां कलादानं सोमोत्पत्तौ पद्यते प्रथमा पिबते वह्निः द्वितीयां पिबते
रविरित्यादि पंचदशी प्रजापतिरित्यंतेन इदानीं सर्वतिथिसाधारणीं परिभाषां ब्रूते शुद्धा विद्धा
तिथिः शुद्धा हीना तिथ्यान्यया हानि शुद्धा विद्धा चेति तिथिर्द्विधा अन्यया तिथ्या उदयास्तमयांत
रालरहिता शुद्धेत्यर्थः विद्धां लक्षयति उदये पूर्वया तिथ्या विध्यते त्रिमुहूर्त्तकैः सायंतूत्तरया तद्वत्. एमः १८

नयातुन विध्यते सूर्योदये पूर्वया तिथ्या त्रिमुहूर्त्तमितया उत्तरा विधिर्विध्यते तथा सायं त्रिमुहूर्त्तमित
याउत्तरया विध्यते न तु न्यूनयेत्यर्थः विद्धा तु त्रिमुहूर्त्तैव न न्यूना वेधमहर्निं त्रिमुहूर्त्तपरिमितेव दि
ने विध्यमाना विद्धा भवति न न्यूनेत्यर्थः तथा च पैठिनसि पक्षद्वयेपि तिथयः तिथिं पूर्वां तथोत्त
रां त्रिभिर्मुहूर्त्तैर्विध्यंति सामान्योयं विधिः स्मृत इति तथा उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ
द्विमुहूर्त्तं त्रिरह्नश्च सा तिथिर्हव्यकव्ययोः इति विष्णुधर्मोत्तरवचनात् अस्यार्थः संवेधी द्विमुहूर्त्तं त्रिमु
हूर्त्तं वेत्यन्वयः दैवतं दैवतयोग्यं द्विमुहूर्त्तमित्यनुकल्पः तथा पौर्वाह्णिकास्तु तिथयो दैवतं दे
वकर्मयोग्यं द्विमुहूर्त्तमित्यनुकल्पः पित्र्ये पितृकर्मयोग्यं अतः सा तिथिः क्रमेण हव्यकव्ययो

ग्राह्येत्यर्थः वैदेवकार्याः प्रयत्नत इति वृद्धयाज्ञवल्क्यवचनादपि त्रिमुहूर्त्तसत्वमावश्यकं पूर्वाह्णशब्द
स्याह्नः पूर्वो भाग इति व्युत्पत्त्यादिनाद्यभागवचनत्वात्तस्य पंचधाविभागे त्रिमुहूर्त्तकालकत्वात् शुद्धा॰
यां नास्ति सन्देहो दैवे पित्र्ये च कर्मणि दिनद्वयसत्वे हि संदेहः तदभावान्न संदेह इत्यर्थः उपवासश्चै
कभक्तं नक्तं चायाचितं व्रतं दानं च षड्विधं वै क्रमादत्र विविच्यते व्रतं पूजादिरूपमित्यर्थः एको
द्दिष्टं पार्वणं चापि श्राद्धं द्विविधमीर्यते एकोद्दिष्टमिति एकदैवत्यमित्यर्थः पार्वणं त्रिदैवत्यं उपवा
सप्रतिपन्निर्णयमाह शुक्लपक्ष इति शुक्लपक्षे दर्शविद्धा कृष्णे विद्धा द्वितीयया तूपोष्या प्रतिप रामः
च्छुक्ले मुख्या स्यादापराह्णिकी ३३ तदभावे तु सायाह्नव्यापिनी परिगृह्यतां तथा च पैठीनसिः पंच २९

मी सप्तमी चैव दशमी च त्रयोदशी प्रतिपन्नवमी चैव कर्त्तव्या सन्मुखी तिथिः सन्मुखीत्वं च स्कंदपुराणे वि
वेचितं सन्मुखी नाम सायाह्नव्यापिनी दृश्यते यदा प्रतिपत्सन्मुखी कार्या या भवेदापराह्णिकी व्या
सापि प्रतिपत्सैव विज्ञेया या भवेदापराह्णिकी दैवकर्मतदा ज्ञेयं पित्र्यं वा मनुरब्रवीत् सायाह्नाद
यः सावनदिवसस्य भागविशेषा इत्याह प्रातःसंगवमध्याह्नापरापराह्णाः सायमित्यसौ चाह्नः
पंचधा भागा मुख्या द्वित्र्यादिभागतः प्रातरिति मुख्यः श्रेष्ठः द्वित्र्यादिति द्विधा त्रेधा इति भागेष्वित्य
र्थः तथा च सूर्योदयमारभ्य मुहूर्त्तत्रयं प्रातर्भागः ततस्त्रिमुहूर्त्तत्रयं संगवः ततो मुहूर्त्तत्रयं मध्या
ह्नः ततो मुहूर्त्तत्रयमपराह्णः ततो मुहूर्त्तत्रयं सायाह्नः तथा च व्यासः मुहूर्त्तत्रितयं प्रातस्तावान

Indira Gandhi National
Centre for the Arts

चतुःसंगमः मध्याह्नस्त्रिमुहूर्तः स्यादपराह्णोपि तादृशः सायाह्नस्त्रिमुहूर्तस्तु सर्वधर्मबहिष्कृत इति मुहूर्तै
र्गृहीनवदिनस्य पंचदशभागउच्यते तस्यैव दिनवृद्धिह्रासाभ्यां वृद्धिह्रासौ ज्ञेयौ एवं सति यदा प्रतिप
द्द्वयोर्दिनेअस्तात्पूर्वं त्रिमुहूर्तपरिमितापरेद्युश्चास्तमयात्प्राक् त्रिमुहूर्तं प्रविष्टा द्वितीयया विद्धा भ
वति तदा दर्शो विद्धायाह्या सा च पूर्वदिनेऽपराह्णेपि यद्यवर्त्तते तदा प्रेष्ठा तदभावे सायाह्नव्यापिन्यपि
ग्राह्येत्यर्थः आवर्त्तनात्तु पूर्वाह्णो ह्यपराह्णस्ततः परमिति स्कंदपुराणोक्तद्वेधा विभागो दर्शितः तथा चतुर्धा सूर्यो
दयात्रीन्मुहूर्तानां तु पंचकं पूर्वाह्णः प्रथमः प्रोक्तो मध्याह्नस्तु ततः परं अपराह्णस्ततः प्रोक्तो मुहूर्तानां च
कमिति त्रेधा विभागः आमानातपोपि तस्माद्दह्नस्तु पूर्वाह्णे देवा अशानमभ्यवहंति मध्यंदिने मनुष्या अप राम: १०

से २

राह्णे पितर इति चतुर्धा विभागमाह गोभिलः पूर्वाह्णः प्रहरं सार्द्धं मध्याह्नः प्रहरं तथा आतृतीयादपराह्णः साया
ह्नश्च ततः पर इति एते च द्वेधा विभागादयो यत्र घातकं तत्रैव ग्राह्याः अन्यत्र तु सर्वत्र पंचधा विभाग एवेति स
र्वत्र प्रकृते उपवासप्रतिपत्पूर्वापरयोर्ह्यतिदर्शिते एकादशी तथा षष्ठी अमावास्या चतुर्थिका उपोष्याः पर
रसंयुक्ताः पराः पूर्वेण संयुता इति वचनात् यत्तु प्रतिपत् द्वितीयास्या द्वितीया प्रतिपद्युतेति तदुपवासेत
रविषयं अभावे पि प्रतिपदः कल्प्यः प्रातरिष्यते ३५ पूर्वविद्धायाः प्रतिपदः प्रातरसत्वेपीत्यर्थः संकल्प
उपवासादेः प्रातः संकल्प्य यो विद्वानुपवासव्रतादिकमिति वचनात्प्रतिपदश्च तत्राभावात्कथं संकल्पः स्या
दिति चेत् ज्योतिःशास्त्ररीत्या प्रातरसत्वेपि धर्मशास्त्ररीत्या तत्सत्वात् तथा च देवलः यां तिथिं समनु

Indira Gandhi National
Centre for the Arts

साध्यश्चास्तंयातिदिवाकरः सा तिथिः सकलाज्ञेयादानाध्ययनकर्मस्विति अत्र कर्मस्वितिवहुवचनात्स
कलेदैवकर्मविषयत्वं अत्रास्तमयात्पूर्वं मुहूर्त्तव्यापिनी तिथिं समनुप्राप्येति विवक्षितं अन्यथाश्रवि
ष्ठुत्वाभावेनउत्तरतिथेरेवग्राह्यत्वप्रसंगात् अत एव शिवरहस्ये यां प्राप्यास्तमुपेत्यर्कः सा चेत्स्यात्त्रिमु
हूर्त्तिका धर्मकृत्येषु सर्वेषु संपूर्णां तां विदुर्बुधा इति ननु सर्वादर्पः तथाहि सा त्रिविधा तिथिलक्षणं एवं
दर्पोपरो युक्त्यो हिंसा स्यात्पूर्वकालिकी तिवचनात्कुतोन निर्णयः किं पतद् इति वित्तमेवं एवं वादिवाक्य
स्यैकोद्दिष्टादिविषयत्वात् तथा च व्यासः क्षितीयादिकयुग्मानां प्रयुज्यतानियमादिदिष्ट एकोद्दिष्टादि राम
दृष्ट्या दोक्तासवृद्ध्या द्विवादनेति नियमादिष्वित्यादिशब्देन पित्र्यकर्मव्यतिरिक्तव्रतोपवासादिसकलक २७

र्मणो ग्राह्य एकोद्दिष्टादीत्यादिशब्देन विवाहादिमंगलांगभूत आभ्युदयिक पार्वणश्राद्धस्य वृद्ध्यादेरित्या
दिशब्देन मांगलिकश्राद्धस्य प्रसवृद्ध्यादिइत्यादिशब्देन खर्वस्य ग्रहणं खर्वः साम्यं दर्पो वृद्धिः हिंसा क्षयः न
देव पूर्वेद्युः उल्कः निपद्युपवासं कृत्वा परेद्युः पारणं कुर्यात् तत्र तिथ्यंते विहितं तथा च समंतुः तिथिनक्षत्र
नियमे तिथिभांते च पारणं अतो न्यथा पारणे तु व्रतभंगमवाप्नुयात् इति तत्र विशेषमाह तिथिस्त्रियाम
तो वाक्ये वा तिथ्यंते पारणं भवेत् यामत्रयात्पूर्वं तिथ्यंत लाभे तत्र पारणं त्रियामाद् ऊर्ध्वं तु तिथ्यंत लाभे तु प्रा
तरेव पारणमित्यर्थः यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणमिति वचनात् एवं शुद्धायां परविद्धायां वो
पवासे पि प्रातरेव पारणं उपवासेषु सर्वेषु पूर्वाह्णे पारणं भवेत् अन्यथा फलस्यार्धं धर्ममेवोपसर्पति इ

Indira Gandhi National
Centre for the Arts

तिदेवकालवचनात् धर्मोयमः एकभक्तनक्तायाचितानियां तिथिमुद्दिश्य विहितानि परेद्युस्तत्तिथ्यंतेपारणांकां
र्यं तिथीनामेव सर्वासामुपवासव्रतादिषु तिथ्यंतेपारणांकुर्याद्विना शिवचतुर्दशीमिति स्कांदवचनं आदिपद
नएकभक्तादीनामुपादानात् वत्सोत्सवंव पूर्वेद्युरुपवासवदाचरेत् ३६ पूर्वेद्युः पूर्वविद्धायां प्रतिपदि यथोपवा
सः क्रियते तथा वत्सोत्सवं वकुर्यादित्यर्थः वत्सोत्सवश्चबलिपूजारूपः कार्तिकशुक्लप्रतिपदि ब्रह्मपुराणाद्दो वि
ऋ हितोज्ञेयः मुख्येति मुख्यातिथ्यंतरायपीतिथित्रोयांशहुता मुख्यातिथेः पूर्वविद्धायाः अंतराये तत्र कर्मकरण
तिथिलवेऽपि परेद्युः पूर्वाह्णे विद्यमानोग्राह्यः पूर्वाह्णिकास्तु तिथयो दैवकार्ये फलप्रदाः इत्यादिवचनादिति भावः राम: २२
अद्धा शुद्धाधिका तु कृष्णापि पूर्वा संपूर्तिसंभवात् ३७ शुद्धेति संपूर्णासती अधिका परेद्युः त्रिमुहूर्ता कृष्णापि प्रतिप

ब स्पूर्वैव ग्राह्या संपूर्णासंपूर्णास्य संभवादित्यर्थः एकभक्ते तिथिनिर्णयमाह गृहीतव्याप्येकभक्ते मध्याह्नव्या
पिनी तिथिः एकभक्तं च स्कंदपुराणादर्शितं दिनार्धसमये तीते भुज्यते नियमेन यत् एकभक्तमिति प्रोक्त
मतस्तस्याद्दिवैव ही ति अत्र च दिनार्धस्यापरि सार्धमुहूर्तपरिमितः कालः पंचधाविभागे मध्याह्नस्या
परभागः एकभक्तस्य मुख्यकालः दिनार्धतति समनंतर भागविकल्पात् अस्तमयात्प्राचीनाव शिष्टोगो
णः कालः दिवेत्यभ्यनुज्ञानात् एवं च मध्याह्नस्य कर्मकालत्वात्तद्व्यापिनी तिथिरेकभक्ते ग्राह्या कर्म
णोयस्य यः कालस्तत्कालव्यापिनी तिथिः तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणमिति वचनात् मध्या
ह्नव्यापिनी ग्राह्या एकभक्ते सदा तिथिरिति वचनात् च अत्र मध्याह्नव्याप्तिः षड्धेत्याह परेद्युरेव तद्वा

Indira Gandhi National
Centre for the Arts

मिरेवेपुर्वादिनद्वये ३९ नोभयत्रोभयत्रांशेसाम्येवैषम्यमित्यमी यदपक्षास्तेष्वेकैकव्याप्तौसैवात्रग्राह्या
तां ३९ दिनद्वयेपितद्व्याप्त्यभावव्याप्तावेकदेशात्: समव्याप्तौ वपूर्वैव वैषम्ये त्वधिकव्यापिनाम् ४० परेद्युरेव म
ध्याह्नव्याप्तिः पूर्वेद्युरेव वा उभयत्रापि तद्व्याप्तिः अव्याप्तिर्वा उभयत्रसाम्येन तदेकदेशव्याप्तिः वैषम्येण
वाति ९ तेषुपक्षेषुमध्ये एकस्मिन्नेव दिने मध्याह्नव्याप्तौसैव ग्राह्या: इतरपक्षेषु साम्यपर्यंते पूर्वैव गौ
णकालव्याप्तिलाभात् वैषम्ये त्वधिकव्यापिनी ग्राह्या अन्यांगस्यैकभक्तस्य कालस्वांगपनुसारत: उप
वासप्रतिनिधौ स्वतिथि: स्यादुपवासवत् ४१ यत्र प्रधानपूजादिकं मध्याह्ने विहितं तत्र तदंगत्वेकभक्तं तत्र
प्रधानानुसारेणांगभूतस्यैकभक्तस्य प्रधानदिन एव तदुत्तरं मनुष्ठानं कार्यं उपवासप्रतिनिधित्वेन वि राम: २३

हितं त्वेकभक्तमुपवासतिथौ कार्यमित्यर्थः इत्येकभक्तनिर्णयः अथ नक्तं निर्णीयते प्रदोषव्यापिनी नक्ते
तिथिर्व्याप्तिर्दिनद्वये अव्याप्तिर्वाथवांशेन व्याप्तिः स्यात्सर्वथा परा ४२ सौरभक्ते तु सायाह्नव्यापिनी न प्रदो
षगा तत्र विष्णुपुराणे मार्गशीर्षे सिते पक्षे प्रतिपद्या तिथिर्भवेत् तस्यां नक्तं प्रकुर्वीत रात्रौ विष्णुं च पूजयेत्
नक्तकालो भविष्यपुराणे मुहूर्तोनदिनं नक्तं प्रवदंति मनीषिण: नक्षत्रदर्शनान्नक्तमहं मन्ये गणाधिप इति
अस्पनकालद्वयस्याधिकारिभेदेन व्यवस्थामाह देवल: नक्षत्रदर्शनान्नक्तं गृहस्थस्य बुधै: स्मृतं यतेर्दि
नाष्टमे भागे तस्य रात्रौ निषिध्यत इति स्मृत्यन्तरेपि नक्तं निशायां कुर्वीत गृहस्थो विधिसंयुत: यतिश्च
विधवाश्चैव कुर्यात्तत्सदिवाकरं सदिवाकरं तु तत्राक्तं प्रतिमे घटिकाद्वये निशानक्तं तु विज्ञेयं यामार्धे

Indira Gandhi National Centre for the Arts

प्रथमसदेति रात्रिनक्तभोजने व्यासः त्रिमुहूर्तं प्रदोषः स्याद्भानावस्तंगते सति नक्तं तु तत्र कुर्वीत इति शास्त्रस्य
निर्णयः इति तेदेवं नक्तकालो व्यवस्थितो तत्र नक्तं प्रदोषव्यापिन्यां तिथौ कार्यं तथाह वत्सः प्रदोषव्यापिनी ग्रा
ह्याति तिथिर्नक्तव्रते सदा एकादशीं विना सर्वाः भुक्तेक्ष्ण तथास्मृतेति एकादश्यां तु यन्नक्तं तत्रोदयव्या
पिनी तिथिर्ग्राह्या तदुक्तं स्कंदपुराणे प्रदोषव्यापिनी या ह्यासदा नक्तव्रते तिथिः उदयस्था सदा शुद्ध्याहरिनक्त
व्रते तिथिरिति प्रदोषश्च त्रिमुहूर्तं प्रदोषः स्याद्भानावस्तंगते सति नक्तं तु तत्र कर्तव्यमिति शास्त्रस्य निश्चयः इति
व्यासवचनोक्तः रिपरिभाषिकोज्ञेयः अत्र पूर्ववत्प्रदोषव्याप्तेः षट्पक्षाइत्याह व्याप्तिर्दिनद्वये इति तत्रैके राम:
कदिनव्याप्तौ संशयभावात्पक्षद्वयं नोक्तं तत्र दिनद्वयव्याप्तौ जाबालिः सैव तिथ्योरुभयोः प्रदोषव्यापिनी ३५

तिथिः तत्रोत्तरत्र नक्तं स्यादुभयत्रापि सा यत इति उभयत्रापि दिवारात्रौ वसा तिथिर्विद्यते यत इत्यर्थः उभयत्र
प्रदोषव्याप्त्यभावेपि परैवेत्याह जाबालिः अन्यथात्वे परत्वस्यादस्तादर्वाग्यतो हि सेति अन्यथात्वे उभयत्र प्रदो
षव्याप्त्यभावे तेन सायाह्नव्याप्तिर्गौणकल्प इत्यभिप्रायः एवं च गृहस्थोप्येतादृशविषये दिवानक्तमाचरेत् प्र
दोषव्यापिनी तस्याद्दिवानक्तं विधीयते आत्मनो द्विगुणच्छायामतिक्रामति भास्करे तन्नक्तं नक्तमित्याहुर्न नक्तं
निशि भोजनं एवं ज्ञात्वा ततो विद्वान्सायाह्ने तु भुजिक्रियां कुर्यान्नक्तव्रती नक्तं फलं भवति निश्चितमिति य
त्तु सप्तमीभानुवारादौ रविनक्तं विहितं तत्र पूर्वोक्तिविपर्ययेण सायंकालव्याप्तिर्मुख्यकल्पः प्रदोषव्याप्तिस्तु
कल्पः अत एव सुमंतुः त्रिमुहूर्तस्पृगेवाह्नि निशि चैतावती तिथिः तस्यां सौरं भवेन्नक्तमहन्येव तु भोजनं

Indira Gandhi National
Centre for the Arts

मिति-अत्र सायंप्रातर्मुख्यकालत्वात्प्रथमतो निर्देशः प्रदोषव्याप्तेरनुकल्पत्वात्पश्चान्निर्देशः यत्तु रविवारादौरा
त्रिभोजननिषेधस्तत्र गृहस्थोपि दिवैव नक्तं कुर्यात् तथा च भविष्यपुराणे ये त्वादित्यदिने ब्रह्मन्नक्तं कुर्वन्ति मान
वाः दिनांते ते पितृभिर्नारीरन्निषेधाद्रात्रिभोजनेन इति अस्मिंश्च दिवाभोजने उत्तमोंतिममुहूर्तो मध्यम उपान्त्यस्ततः
प्राचीनो जघन्यः एवं वसतिश्चांतिमभागत्रिमुहूर्तवचनाद्युपपद्यते रात्रिभोजने घटिकात्रयमुत्तमकालः
घटिकाषट्कं मध्यमकालः अत्राप्यन्यांगे उपवासस्थानीये च पूर्वोक्त एव निर्णयः तथा च रथसप्तमीव्रते
द्वितीयादिसप्तम्यंतेषु पंचसु दिनेषु क्रमेणैकभक्तनक्तायाचितोपवासपारणानि विहितानि तत्र तृतीयायाम् राम
त्रयपरिमिता न तद्‍ऊर्ध्वं चतुर्थी तदाष्टकभक्तनक्तयोरेकस्मिं दिवसे प्राप्तौ प्राथम्यादेकभक्तस्य मुख्यकाले २५

अनुष्ठानं नक्ते त्वनुकल्पः स च द्विविधः दिनांतरानुष्ठानात्कर्त्रंतरानुष्ठानाच्च यदा चतुर्थी परेद्युर्द्विघटा सायंकालं
व्याप्नोति तदा तस्य गौणकालं देकस्य च कर्ता दिनभेदेन व्रतद्वयमनुष्ठेयं यदा चतुर्थी सप्तमी शीर्णा वा तदा गौण
कालस्याप्यसंभवेन पूर्वेद्युरेव भार्यापुत्रादिना कर्त्रंतरेण तन्नक्तं करणीयं इति नक्तनिर्णयः अयाचितेतु
पे ५ तिथयः स्वीकार्या उपवासवत् अयाचितं तु याचितभोजननिषेधरूपं याचितभिन्नभोजनरूपं वा तत्राद्यप
क्षे गौतमश्चाह अथापरं त्र्यहं नक्तं च न याचेतेति द्वितीयं तु बृहस्पतिराह त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमध्या
दाचितं उभयत्राप्युपवासतिथिर्ग्राह्येत्यर्थः सोदयत्रिमुहूर्तायां कुर्याद्दानव्रतानि वै उदयमारभ्य त्रि
मुहूर्त्तवर्त्तमानायामित्यर्थः तदाह याज्ञवल्क्यः पौर्वाह्णिकास्तु तिथयो दैवे कार्ये फलप्रदा इतिक्रम

Indira Gandhi National
Centre for the Arts

यत्रतथात्वेनपूर्वेद्युरस्तदनुष्ठितिः परत्रचतथात्वेतत्पूर्वाग्राह्यातिथिक्षये तिथेःसाम्येवृद्धौवाग्राह्योत्त
तिथिरुत्तरा ४५ अस्यार्थःएकदेशस्यव्याप्तौपूर्वेद्युर्ग्राह्या दिनद्वयेपूर्वाह्णव्याप्तिःपूर्वेद्युरस्तदनुष्ठानपरत्रैव
तद्व्याप्तौतिथिक्षयेपूर्वा साम्यवृद्धौतुपरा दिनद्वयेपिपूर्वाह्णाव्याप्तौएकदेशव्याप्तौवापूर्वाग्राह्येतिदान
व्रतनिर्णयः अथपित्र्यंनिर्णीयते एकोद्दिष्टंतुमध्याह्नप्राप्तास्यादिकभक्तवत् एकमुद्दिश्यक्रियमाणं
श्राद्धमेकोद्दिष्टं त्रीनुद्दिश्यक्रियमाणंपार्वणं तदाहकात्यायनः एकमुद्दिश्ययच्छ्राद्धमेकोद्दिष्टंप्रकीर्तितं
त्रीनुद्दिश्यतुयत्तद्धिपार्वणंमनयोविदुरिति तदेकोद्दिष्टेमध्याह्नव्यापिनीपार्वणेचापराह्णव्यापिनीति
थिर्ग्राह्या तथाचगौतमः मध्याह्नव्यापिनीयास्यात्सैकोद्दिष्टेतिथिर्भवेत् अपराह्णव्यापिनीयापार्व राम
२६

णीसातिथिर्भवेदितिहारीतोपि अमाश्राद्धंतुपूर्वाह्णेएकोद्दिष्टंतुमध्यमे पार्वणंचापराह्णेतुप्रातर्वृद्धि
निमित्तकमिति मध्याश्चसप्तमाष्टमनवममुहूर्त्तात्मकः तत्रैकैकदिनेमध्याह्नव्याप्तौनसंदेहः दिनद्वयेन
व्याप्तौपूर्वाह्णे अपराह्णः पितॄणांतुयापराह्णानुयायिनीसाग्राह्या पितृकार्येतुनपूर्वास्तानुयायिनी
तिहारीतवचनात् यस्यामस्तंरविर्यातिपितरस्तामुपासतेइतिवृद्धमनुवचनाच्च एकदेशेसमव्याप्तौ
क्षयेपूर्वान्यथोत्तरा क्षयेतिथिक्षये अन्यथावृद्धिसाम्ययोर्वैषम्येणैकदेशव्याप्तौत्वधिकव्यापि
नीग्राह्या पार्वणनिर्णयमाह कुतपाद्यपराह्णान्तव्यापिनीदर्शिकात्तमा ४७ अष्टमेभास्करोयस्मात्
मन्दोभवतिसर्वदा तस्मादनंतफलदस्तत्रारंभोविधीयतां ऊर्ध्वंमुहूर्त्तात्कुतपाद्यन्मुहूर्तचतुष्टयं मु

Indira Gandhi National
Centre for the Arts

हूर्त्तपंचकंद्योतत्वथाभवनभिध्यनङ्गतिमात्स्यात् तदभावेपराह्णस्यव्याप्तिकाग्रह्यतांतिथिः मुहूर्त्तपंच
कंव्याप्त्यभावइत्यर्थः पित्र्यर्थेवापराह्णिकीतिसामान्यवचनादितिभावः क्षयेपूर्वोत्तराह्योव्याप्तिस्त
दपराह्णयोः ४८ उभयत्रापराह्णव्याप्तौतदभावेएकदेशसमव्याप्तौवक्षयेपूर्वा पक्षांतरेसाम्येवध्याः
परेत्यर्थः अपराह्णद्वयव्यापिन्यतीतस्य यदातिथिक्षयेवपूर्वावकर्त्तव्यारुद्धोकार्यातथोत्तरेतिवा
धायनवचनात् त्र्याहस्पृतिथिगोवृद्धि क्षया खंतिथिस्तौ अपराह्णद्वयव्याप्तस्यतिथिवृद्धिनियत
त्वेत्र्याहस्पृतिथिक्षयासंभवादितिभावः वृद्धिवेदवसाम्येपिपरेवेत्याह साम्येतूर्ध्वतिथिग्रौपरविद्धेवहः श्रा०२ रामः
द्धिवत् ४९ उभयत्रापराह्णव्याप्त्यभावेनिर्णयमाह नस्पृशेदपराह्णं स्याल्कुतपाद्यथा दतदाहमनुः ३७

नह्णव्यापिनीचेत्स्यान्मृताहेतुयदातिथिः पूर्वविद्धेवकर्त्तव्याजिमुहूर्त्तायदिति वैषम्येएकदेशस्यव्याप्ते
र्ग्राह्यामहतत्वः ५७ तथावमरीचिः अपराह्णव्यापिनीचेदाह्निकस्यथातिथिः महतीतत्रतद्विधांपयांसंति
महर्षयइति एकदेशसाम्येनोभयत्रव्याप्तोत्याह साम्येनवेक्षयंपूर्वापरास्याद्धद्धिसाम्ययोः वृद्धिसाम्य
क्षयाथाह्याहतिथिगानोर्ध्वगाइह ५१ खर्वोदर्पइत्यादिवाक्यादित्यर्थः इतिमाधवाचार्यकारिकायांवि
विवरणेप्रतिपन्निर्णयाख्यंतृतीयंप्रकरणं अथचतुर्थंप्रकरणविषयमाह द्वितीयाद्यास्तुपर्वांतात्
र्यप्रकरणादिना तत्रप्रतिपदियोनिर्णयः पूर्वमुक्तः सएवसमानत्वादुत्तरासुसर्वतिथिषुसंचारयितव्यइ
त्याह संचारणीयःसर्वासुतिथिषुप्रतिपन्नयः ५२ क्वचित्कविशेषाभिलिसायमत्राभिधीयते अस्मि

Indira Gandhi National
Centre for the Arts

अकरणादित्यर्थः पूर्वेद्युरसतीप्रातः परेद्युस्त्रिमुहूर्त्तगाः ५३ सा द्वितीया परोपोष्या पूर्वविद्धा ततोपरा यु
ग्माग्नियुगभूतानां षण्मुन्योर्वसुरंध्रयोः रुद्रेण द्वादशीयुक्ता चतुर्दश्याथ पूर्णिमा प्रतिपद्यप्यमावा
स्या तिथ्योर्युग्मं महाफलं एतद्व्यस्तं महादोषं हंति पुण्यं पुराकृतमिति युग्मं द्वितीया अग्निस्तृतीया
युगं चतुर्थी भूतं पंचमी षट् षष्ठी मुनिः सप्तमी वसुरष्टमी रंध्रं नवमी रुद्र एकादशी अत्र युग्मान्या
दिसप्तयुग्मेषु पूर्वतिथिरुत्तराग्राह्याः उत्तरा पूर्वविद्धेत्युक्तं भवति एवं च द्वितीया तृतीयाविद्धा ग्राह्ये
त्यर्थः उपवासविषयत्वं च एकादश्यष्टमी षष्ठी द्वितीया च चतुर्दशी त्रयोदशी चतुर्थी च उपोष्याः स्युः रामः
परान्विता इति वचनाज्ज्ञेयं नतोपराभिन्ना पूर्वविद्धा ग्राह्या सा यथा पूर्वेद्युरुदयमारभ्य अस्तमनादि २९

---

तीयदिने पि त्रिमुहूर्त्ता सा पूर्वैव संपूर्णत्वेन संदेहाभावात् तथा परेद्युस्त्रिमुहूर्त्तभिन्नाया अभावे पि पूर्वै
वेति ज्ञेयं यदा पूर्वेद्युः पूर्वाह्णैकदेशमारभ्य परेद्युस्त्रिमुहूर्त्ता सापि पूर्वैव प्रतिपत्संमुखी कार्या या भवेद
पराह्णिकी पौर्वाह्णिकी च कर्तव्या द्वितीया नादशाभिभा इति स्कांदात् इति द्वितीयानिर्णयः तृतीया
निर्णयमाह रंभा तृतीया पूर्वा स्यादुत्तरा स्याद्व्रतांतरे परेह्नि नास्ति चेत्पूर्वा विद्धाप्यन्यव्रतांतरे रंभा
व्रतं च भेद्र कुरुष्व यत्नेन रंभाख्यं व्रतमुत्तमं ज्येष्ठशुक्लतृतीयायां स्नात्वा नियमतत्परः इति स्कांदोक्तं
तत्र तृतीया पूर्वविद्धा ग्राह्या रहस्त्रपा तथा रंभा सावित्री वरपैतृकी कृष्णाष्टमी च भूता च कर्तव्या सं
मुखी तिथिरिति तत्रैवोक्तं व्रतांतरे तु तृतीया चतुर्थीयुता ग्राह्या रंभाख्यां वर्जयित्वा तु तृतीया द्विज

Indira Gandhi National
Centre for the Arts

सप्तम अन्येषु:सर्वकालेषु गणयुक्ता प्रशस्यते इति ब्रह्मवैवर्तात् गणो गणेशः तद्वत्या चतुर्थी
तद्युक्तेत्यर्थः अत्र द्वितीयावेधः कालामात्रोपि निषिद्धः चतुर्थीयोगश्च कालामात्रोपि ग्राह्यः कला
काष्ठापि वा चैवं द्वितीया यत्र दृश्यते सा तृतीया न कर्त्तव्या कर्त्तव्या गणसंयुतेति स्कांदात् द्वितीया
शेषसंयुक्तां तृतीयां कुरुते तु यः स याति नरकं घोरं कालसूत्रं भयंकरं द्वितीयाशेषसंयुक्तायां क
रोति विमोहिता सा वैधव्यमाप्नोति प्रवदंति मनीषिणः इति निंदार्थवादेश्च शेषशब्दश्रवणाच्च एतच्च
गौरीव्रत एव तथा शिष्टाचारात् व्रतांतरेषु त्रिमुहूर्त्तैव ग्राह्या एव ज्ञेयः तदाह मुहूर्त्तमात्रसत्वे तु दिने गौ राम
रीव्रतं भवेत् शुद्धाधिकायामप्येवं गणयोगप्रशंसनात् ५५ एवं पराग्राह्येत्यर्थः इति तृती २९

यानिर्णयः चतुर्थी तु परा ग्राह्या गणनाथव्रतेषु तु मध्याह्नव्यापिनी चेत्स्यात्तदा नागचतुर्थ्यपि ५६ परे रेवम
ध्याह्नव्याप्तौ विघ्नेशस्य चोत्तरा अन्यथा पूर्वविद्धैव मातृयोगप्रशंसिनः ५७ चतुर्थी त्विति युग्मवाक्यादिति
भावः एकादशी तथा षष्ठी अमावास्या चतुर्थिका उपोष्या परसंयुक्ता परा पूर्वेण संयुता इति वृद्धवशि
ष्ठवचनाच्च द्वितीया पंचमी विद्धा दशमी च त्रयोदशी चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे तिथी इति वचनं तु प
रविद्धानिषेधकं तत्रेत्थं व्यवस्था विनायकनागगौरीव्रतातिरिक्तपरा विनायकादिव्रते तु मध्याह्न
व्याप्त्या निर्णयात्कदाचित्पूर्वेद्युः साम्येन तद्विषयक पंचमीविद्धानिषेधो व्यवस्थाप्यः विनायकव्रते म
ध्याह्नव्याप्तिमाह बृहस्पतिः चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते मध्याह्नव्यापिनी चेत्स्यात्परतश्चे

Indira Gandhi National
Centre for the Arts

त्यहनीति नागव्रतेपि युग्मंमध्यदिने यत्र तत्रोपोष्या फणीश्वरा इति वचनान्मध्याह्नव्यापिनी त्वं द्वयं प्र-
वेधुरेव तन्मात्रोपोष्वासर्पप्रिया तिथिः तन्मात्रो मध्याह्नव्याप्तो नो चेत्सर्पस्य पंचम्यायोगात्त्वं तत्रस्त्रस्येत
पक्षांतरेपीत्यर्थः चतुर्थीपंचमीयुक्ता नागप्रीतिविवर्द्धिनी प्रीताः स्युः पूजितास्तस्यां नागास्तां तत्र च
जयेदिति वचनादिति भावः गौण्याः षड्जयाप्यस्तु नागविद्धा निषिध्यते जया च यदि संपूर्णा च तु
र्थीक्षते पुनः जया सैवाह्नि कर्त्तव्या नागविद्धां न कारयेदिति वचनादित्यर्थः इति चतुर्थीनिर्णयः
अथ पंचमीनिर्णयमाह सर्वत्र पंचमी पूर्वा ग्राह्या स्कंदव्रते परा ५९ युगभूतानामिति युगवाच पम:
तुर्थीसंयुता कार्या पंचमी परया न तु दैवे कर्मणि पित्र्ये च शुक्लपक्षे तथासिते इति वचनाच्च पंचमी ३०

---

तु स्कर्त्तव्या यस्मात्युक्ता तिनारदेति वचनं तु स्कंदोपवासविषयं स्कंदोपवासस्त्री कार्या पंचमी परसंयुते ति वा-
क्यत्रोघात् इति पंचमीनिर्णयः षष्ठीनिर्णयमाह नागविद्धा स्कंदषष्ठी सा निषिद्धा व्रतांतरे उत्तरस्याश्चलाभे
तु नागविद्धापि गृह्यतां ६० तथा च वशिष्ठः कृष्णाष्टमी स्कंदषष्ठी शिवरात्री चतुर्दशी एताः पूर्वयुताः कार्यास्ति
थ्यंते पारणं भवेदिति सा निषिद्धेति तथा च निगमः नागविद्धा तु या षष्ठी रुद्रविद्धो दिवाकरः कामविद्धो भ
वेद्विष्णुर्न ग्राह्यास्त्रिषु वासरा इति रुद्र अष्टमी दिवाकरः सप्तमी कामस्त्रयोदशी एवं सति षण्मुन्यारिति युग्मवा
दपि व्रतांतरे परा ग्राह्या नागवेधस्तु पराभुहूर्त्तपरिमितो बोध्यः नागो द्वादशनाडीभिरिक्पुवदशाभिस्तथा भू
तो द्वादशनाडीभिर्दूषयंत्यपरां तिथिमिति स्कांदादित्यभिप्रेत्याह बिना द्वादशनाडीभिर्नागवेधान दोषकृत्

Indira Gandhi National
Centre for the Arts

इति षष्ठीनिर्णयः सप्तमीनिर्णयमाह सप्तमी पूर्वविद्धैव व्रतेषु निखिलेष्वपि ६९ अलाभे पूर्वविद्धायाः परवि
द्धापि गृह्यतां सप्तमीति षण्मुन्योरिति युग्मवचनात्षष्ठ्येकादश्यमावास्या पूर्वविद्धा तथाष्टमी सप्तमी
परविद्धा न तु पोष्या तिथिपञ्चकमिति वचनाच्च इति सप्तमीनिर्णयः व्रतमात्रेष्टमी कृष्णा पूर्वा शुक्लाष्ट
मी परा व्रतेति ७२ कृष्णपक्षेष्टमी या च कृष्णपक्षे चतुर्दशी पूर्वविद्धा तु कर्तव्या परविद्धा न कर्हिचित् उ
पवासादिकार्येषु ह्येष धर्मः सनातन इति निगमवचनात् शुक्लाष्टमी तु वसुरंध्रयोरिति युग्मशास्त्रात्
शुक्लपक्षेष्टमी चैव शुक्लपक्षे चतुर्दशी पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुतेति निगमवचनाच्च दूर्वाष्ट
मी तु शुक्लापि पूर्वविद्धा विधीयते श्रावणी दीर्गनवमी तथा शुक्लाष्टमी च या पूर्वविद्धैव कर्तव्या शिव राम: ३२

रात्रिर्बलेर्दिनमिति पद्मवचनादित्यर्थः पक्षद्वयेपुत्रैः शिवरात्रिमहोत्सवे शुक्ले कृष्णे चेत्यर्थः अष्टमी
नवमीविद्धा नवम्या चाष्टमी युता अर्धनारीश्वरप्राया उमामाहेश्वरी तिथिः अष्टमीनवमीयुग्मे महोत्सा
हे महोत्सवः शिवरात्र्योः शिवक्षेत्रपक्षयोरुभयोरपीति पद्मपुराणात् ज्येष्ठर्क्षयोगे पूर्वापि ग्राह्याज्ये
ष्ठाव्रते तिथिः मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुते यस्मिन्कस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजन
मिति स्कान्दे ज्येष्ठाव्रतमुक्तं तत्र शुक्लाष्टमी नक्षत्रवशात्पूर्वेत्यर्थः नक्षत्रयोगाभावे तु शुक्लत्वात्प
२र रैव मध्याह्नात्पूर्वमृक्षं चेत्परेद्युः सा सत्र ग्राह्यते ६४ यस्मिन्दिने भवेज्ज्येष्ठा मध्याह्नात्पूर्वमप्यरा: तत्र
स्मिन्हि विष्णुपूजा च स्मृतो चेत्पूर्ववासर इति स्कान्दादित्यर्थः ज्येष्ठर्क्षे भानुवाराभ्यां युक्ताष्टम्यतिदुर्लभा

Indira Gandhi National
Centre for the Arts

नभाष्टम्यां यदा वारो भानोर्देवर्क्षमेव च नील[?]स्पष्टे निसा भो दुर्लभा बहुकाल[?]लिके स्कांदा इतिर्त्यर्थः जन्मा॰
ष्टमीनिर्णयमाह जयंत्याख्यं व्रतं भिन्नं तस्मात् जन्माष्टमीव्रतात् ६५ जयंती जन्माष्टमी तिनामभेदात्
रोहिणीनक्षत्राष्टमीतिथिरूपनिमित्तभेदाच्चेति भावः एवं दानादिसहितोपवासप्रविशेषप्रक्तो जयं॰
तीव्रतस्वरूपं उपवासमात्रस्वरूपं च जन्माष्टमीव्रतमिति निर्णयं वक्तुं भेदानाह शुद्धा च सप्तमीविद्धेत्य
वं जन्माष्टमी द्विधा वेधविशेषमाह सप्तमी चेन्निशीथात्प्राक् विद्धा तद्वान्यथा भवेत् ६६ शुद्धायां नास्ति
वेधपिविशेषमाह ... राम:
संदेहो विद्धायां तु विशिष्यते यद्यपि दिवैव वेधः पूर्वमुक्तस्तथापि रात्रिप्रधानकर्मणि रात्रिवेधोपि भ ३२
वति अहः सु तिथयः पुण्याः कर्मानुष्ठानतो दिवा नक्तादिव्रतयोगे तु रात्रियोगो विशिष्यते इति बोधाय

नादिवचनादिति भावः अत्र चार्द्धरात्रस्य मुख्यकालत्वमुक्तं वशिष्ठसंहितायां अष्टमी रोहिणीयुक्ता निश्यर्द्धे द
श्यते यदि मुख्यकाल इति ख्यातस्तत्र जातो हरिः स्वयमिति अयं च बोधो ग्राह्योयाष्टम्यां तत्रैव यत्ने तथा च वि
ष्णुधर्मोत्तरे रोहिणीसहिता कृष्णा मासि भाद्रपदेष्टमी सप्तम्यामर्धरात्राधः कलयापि यदा भवेत् तत्र जातो
जगन्नाथः कौस्तुभी हरिरीश्वरः तमेवोपवसेत्कालं तत्र कुर्याच्च जागरमिति अर्द्धरात्रं निशीथशब्दाभ्यां च
रात्रेरष्टमुहूर्तो मध्यगतो निर्दिश्यते तत्र सकलमुहूर्त्तव्याप्तिर्मुख्या घटिकामात्रव्याप्तिस्तु मध्यमा कलामा
त्रव्याप्तिरधमा प्रागुदाहृता मध्यमातमपक्षद्वयं तु योगीश्वरस्याह अर्द्धरात्रादधस्तोर्ध्वमेकार्द्धघटिका
एका वार्द्धघटिका वेकार्द्धघटिकेन व्याप्य विना क
विना रोहिणी वाष्टमी ग्राह्या उपवासव्रतादिष्विति

लामपेक्षार्द्धघटिकास्थूला नामेपेक्ष्यघटिकास्थूला तत्रायमर्थः संपद्यते पूर्वभागावसानस्यैकाघटिकाउ
त्तरभागादौ चैकामीलित्वा तन्निशीथव्याप्तत्वान्मुहूर्त्तं तावत्परिमाणं सर्वैरपि स्थूलक्ष्मत्वान्मुख्यः कल्पः त
दसंभवेर्द्धघटिकाव्याप्तत्वात्तस्याप्यसंभवे कलेति अत्र जयंत्यां वृद्धार्घ्यस्यावश्यकर्त्तव्यत्वात्तस्य चंद्रोदय-
कालीनत्वान्निशीथयोगः प्रशस्तः एतदेव विष्णुधर्मोत्तरेभिहितं अर्द्धरात्रेतु योगोयं तारापत्युदये तथा नि
यतात्मा शुचिः स्नातः पूजां तत्र निवर्त्तयेदिति निशीथयोगः पूर्वद्युः परद्युर्वा द्वयोरुत ६७ पूर्वेव प्रथमपक्षे
परेद्योरुत्तरपक्षयोः प्रथमपक्षे पूर्वद्युरेव निशीथयोगः तत्पक्षयोः परद्युरेव द्वयोर्वा निशीथयोग रोहिणीयु रामः
कायाः अष्टम्याभेदानाह अष्टमी रोहिणीयुक्ता जयंती सा च तुर्विधा शुद्धा शुद्धाधिकैत्येवं विद्धाविद्धा ३३

---

धिकेति च तत्र भेदद्वयेन संदेह इत्याह अष्टमी रोहिणीयुक्ता शुद्धायामपि विद्धायां न संभाव्योत्तरा निधिः
६९ शुद्धायामपि योगश्चेदेकस्मिन्वा दिनद्वय रोहिणीयोगश्चेदित्यर्थः आद्येन संदेह इत्याह नैकयोगा
त्तसंदेहो द्वियोगे प्रथमं दिनं ७० तथा वयस्मिन्नेव दिने रोहिणीयोगः सैव ग्राह्येति द्वियोगे द्वयोर्दिन
योः रोहिणीयोगे प्रथममिति संपूर्णत्वादित्यर्थः योगश्च त्रिविध इत्याह सदा निशीथ पश्चाद्वा पूर्वमो-
मध्यमोधमः योगस्तथापि पूर्वद्युः संपूर्णत्वादुपोषणं ७१ अहोरात्रं तु तमर्थः निशीथे अर्द्धरात्रेः पश्चा
न्निशीथानंतरं एवं योगेत्रे विद्धापि पूर्वमेव दिनं ग्राह्यं चतुर्थपक्षे माह विद्धाधिकाया मप्येकादिन
योगसंदस्तता द्वयोर्योगाभावाभिन्नो निशीथवृत्तिर्भवेत्: ७२ एकदिनयोगे एकदिनयोग इत्यर्थः

Indira Gandhi National
Centre for the Arts

म०योगो गृह्यतामित्यर्थः दिनद्वयगा विभजते त्रिधेति तदेव विवृणोति तद्यदि दिन एकस्मिन्नुभयोर्नोभयो
रपि एकस्मिन्दिने वदिने निशीथे रोहिणीयोगः उभयोर्दिनयोः सतोरुभयोः सत्त्व इति तत्र निर्णयमाह एकस्मि
श्चेत्तद्दिनं स्यात्पक्षयोरन्त्ययोः परं यस्मिन्नेव दिने विद्धाधिकायाः निशीथे रोहिणीयोगस्तदेव दिनं ग्राह्यमि
श्चेत्पयोरुभयोर्नोभयोरिति पक्षयोः परदिनमित्यर्थः अत्र क्रमेणैव वचनानि तत्र निशीथव्यापिन्या ग्राह्यत्वे दि
वावाय दिवा रात्रौ नास्ति विद्धा रोहिणीकला रात्रियुक्तां प्रकुर्वीत विशेषेणेन्दुसंयुतामिति वचनादवगंतव्यं रोहि
णीयोगस्य मुख्यो निर्णायकः प्राजापत्यर्क्षसंयुक्ता कृष्णा नभसि चाष्टमी मुहूर्तमपि लभ्येत सोपोष्या साम
हाफलेति विष्णुरहस्यात् विना ऋक्षं न कर्तव्या नवमीसंयुताष्टमी कार्या विद्धापि सप्तम्या रोहिणीसहिताष्टमी राम: ३४

इत्यादिपुराणाच्च बुधे सोमे जयंती नैद्वारस्मातिफलप्रदा अतयो निगतानां तु अनंतत्वं नाशितं नरैः येः कृता श्रावणे मा
सि अष्टमी रोहिणीयुता किं पुनर्बुधवारेण सोमेनापि विशेषतः किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदेति पद्म
पुराणादित्यर्थः पारणानिर्णयमाह तिथ्यृक्षयोर्द्वयोरंते उत्तमं पारणं भवेत् ७४ एकस्यांते मध्यमं स्यादुत्सवांते ध
मं स्मृतं तथा च ब्रह्मवैवर्ते अष्टम्यामथ रोहिण्यां न कुर्यात्पारणं क्वचित् हन्यात्पुराकृतं कर्म उपवासार्जितं फलं
तिथिरष्टगुणं हन्ति नक्षत्रं च चतुर्गुणं तस्मात्प्रयत्नतः कुर्यात्तिथिभांते च पारणमिति स्कंदपुराणेपि तिथिन
क्षत्रनियमे तिथिभांते च पारणा अतोऽन्यथा पारणे तु व्रतभंगमवाप्नुयादिति तिथिभांतश्च द्विविधः उभयांत ए
कतरांतश्चेति तत्रोभयांतो मुख्यः एकतरांतो गौणः तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् पारणं तु न क

Indira Gandhi National
Centre for the Arts

र्त्तव्यं यावन्नैकस्यसंग्रह इतिनारदीयात् तत्राप्युभयांत्यलाभेतिथ्यर्क्षयोर्यदाच्छेदो नक्षत्रांतमथापि वा अर्द्धरा
त्रेपिवाकुर्यात्पारणंत्वपरेहनीति तथा नरात्रौपारणंकुर्यादृतेवैरोहिणीव्रतात् तत्रनिश्यपितत्कुर्याद्वर्जयि
त्वापिवाकुर्यात्पारणंत्वपरेहनीति तथा नरात्रौपारणंकुर्यादृतेवैरोहिणीव्रतात् तत्रनिश्यपितत्कुर्याद्वर्जयि
त्वामहानिशामितिवचनाच्च अक्रमस्कप्रातरेवपारणंकुर्यात् तिथ्यंतेवोत्सवांतेवाव्रतीकुर्वीतपारणमिति
स्मरणात् उत्सवश्चपूजाजागरणरूपः तस्यांतःप्रातःकालइत्यर्थः यस्मिन्वर्षेजयंत्याख्योयोगोजन्माष्टमीत
दा अंतर्भूताजयंत्यास्यात्ऋक्षयोगःप्रशस्तितः ७५ जयंत्याख्यः अष्टमीरोहिणीरूपः अंतर्भूतेति जयंतीव्रता
नुष्ठानेचरितार्थेत्यर्थः कुतस्तत्राह अस्तीति जन्माष्टम्याअपिरोहिणीयोगेवयाद्यत्वोक्तेरित्यर्थः इत्यष्टमी
प्रकरणं नवमीनिर्णयमाह नवमीपूर्वविद्धेवपक्षयोरुभयोरपि वसुरंध्रयोरितियुग्मवाक्यात् अष्टम्या राम: ३५

नवमीविद्धानवम्यावाष्टमीयुता अर्द्धनारीश्वरप्रायामुमामाहेश्वरीतिथिरितिपाद्मेचेति मध्याह्नेरामनव
मीपुनर्वसुसमन्विता ग्राह्यानेवाष्टमीयुक्तामनक्षत्रापिवैष्णवैः मध्याह्न इति रामनवमी चैत्रशुक्लनवमी
मध्याह्नव्यापिनीपुनर्वसुनक्षत्रयुताग्राह्या चैत्रशुक्लतुनवमीपुनर्वसुयुता यदिसैवमध्याह्नयो
गेनमहापुण्यतमाभवेदितिवचनात् अत्रमध्याह्नव्यापित्वस्यनिर्णायकत्वंपुनर्वसुयोगस्तुप्राशस्त्य
मात्रं तेनमध्याह्नव्याप्तिरिति द्वयसत्त्वे उभयत्रासत्त्वेपुनर्वसुयोगोनिर्णायकः वैष्णवानामष्टमीविद्धा
त्याज्या नवमीचाष्टमीविद्धात्याज्याविष्णुपरायणैः उपोषणंनवम्यांवैदशम्यांपारणंभवेदितिवचना
त् इतिनवमीनिर्णयः दशमीनिर्णयमाह कृत्वापूर्वोत्तरा शुक्लादशम्येवंव्यवस्थिता शुक्लपक्षेति

थिर्याद्यायस्यामप्युदितोरविः कृष्णपक्षेतिथिर्याद्यायस्यामस्तमितोरविरितिवचनात् तेनपराविद्धानिषे
धा कृष्णपक्षदशमीविषया: इतिदशमीनिर्णयः अथैकादशीनिर्णयमाह जयंतीव्रतवन्नित्यंकाम्यंचैका
दशीव्रतं उपोष्येकादशीनित्यंपक्षयोरुभयोरपी तिगरुडपुराणेनित्यमनित्याभिधानात् नकरोतिहियाभू
कएकादश्यामुपोषणं सनरोनरकंयातिरौरवंतमसावृतमितिसनत्कुमारवचनाच्च तथाविष्णुरहस्ये
यदीच्छेद्विष्णुसायुज्यंश्रियंसंततिमात्मनः एकादश्यांनभुंजीतपक्षयोरुभयोरपीतिफलश्रवणाच्च
नित्यकाम्यमयरूपमेकादशीव्रतमित्यर्थः अरुणोदयवेधोत्रवेधः सूर्योदयेतथा उक्तोदशमीवे एप
धोवेध्यवः स्यात्तयोः क्रमात् ७० कलाकाष्ठादिवेधोपिग्राह्योत्रत्रिमुहूर्तवत् उदयात्प्राक्चतस्र ३६

स्तुनाडिका अरुणोदयस्तत्रदशमीयवेधो अरुणोदयवेधोभवति सूर्योदयेतत्रवेधो सूर्योदयवेधः वै
ष्णवलक्षणमाह वैखानसाद्यागमोक्तदीक्षाप्राप्तातीतिवैष्णवः तथास्कंदे परमापदमापन्नो
हर्षेवासमुपस्थिते नैकादशीत्यजेद्यस्तुयस्यदीक्षास्तिवैष्णवी तथावैष्णवेनारुणोदयविद्धा
नकार्या दशमीवेधसंयुक्तोयदिस्यादरुणोदयः नैवोपोष्यंवैष्णवेनतद्दिनेकादशीव्रतमितिगरु
डपुराणात् सूर्योदयवेधस्तुतिथ्यतिरिक्तस्मार्तविषयः उदयोपरिविद्धातुदशम्येकादशीय
दा दानवेभ्यः प्रीणनार्थंदत्तवान्पाकशासनः इतिस्कंदवचनात् तदाप्येकादशीहित्वाद्वादशी
समुपोषयेदितिवचनात् तत्रविद्धासर्वथैववैष्णवेनत्याज्या भृगुणायामप्याह विद्धात्याज्यैव

Indira Gandhi National
Centre for the Arts

ह्रवेन शुद्धाप्याधिक्यसंदेहे एकादशीद्वादशीवाधिकावेभक्ष्यतोदिनं ८० पूर्वयाह्यं तूत्तरस्यादिति
वैह्ननिर्णय: आधिक्यं चात्र द्विधं एकादशीमात्राधिक्यं द्वादशीमात्राधिक्यं उभयाधिक्यं चेति आ
धिक्यं नाम द्वितीयदिने सूर्योदयोत्तरसत्वं तत्र प्रथमपक्षे नारद आह संपूर्णैकादशी यत्र द्वाद
श्यां वृद्धिगामिनी द्वादश्यां लंघनं कार्यं त्रयोदश्यां तु पारणमिति द्वादश्याधिक्ये व्यासः एकाद
शी यदा लुप्ता परतो द्वादशी भवेत् उपोष्या द्वादशी तत्र यदीच्छेत्परमां गतिमिति उभयाधिक्ये तु
रुराह संपूर्णैकादशी यत्र प्रभाते पुनरेव सा तत्रोपोष्या द्वितीया तु परतो द्वादशी यदि इति वै ३२
ह्रवनिर्णय: एकादशीद्वादश्योरुभयं वर्द्धते यदि तदा पूर्वदिनं त्याज्यं स्मार्तैर्ग्राह्यं परं दिनं ८२ एम
३२

संपूर्णैकादशी यत्र प्रभाते पुनरेव सा तत्रोपोष्या परा पुण्या परतो द्वादशी यदीति गारुडपुराणात् एका
दशीमात्रवृद्धौ गृहस्थादिभिः सर्वैरेवं स्थितैः उपोष्या गृहिभिः पूर्वा यतिभिश्चोत्तरा तिथिः ८२ प्रथमेऽहनि सं
पूर्णा व्याप्याहोरात्रिसंयुता द्वादश्यां च तथा तात दृश्यते पुनरेव च पूर्वा कार्या गृहस्थैश्च यतिभिश्चो
त्तरा विभो इति स्कंदपुराणात् द्वादशीमात्रवृद्धौ तु शुद्धाविद्धयोरवस्थितेन शुद्धापूर्वोत्तरा विद्धा स्मार्त
निर्णय ईदृशः नैवैकादशी विद्धा द्वादशी परतः स्थिता उपोष्यैकादशी तत्र यदीच्छेत्परमं पदमिति
नारदवचनात् एवं शुद्धा भेदाः व्यवस्थिता विद्धाधिकायामप्येकादशीमात्राधिक्ये तु प्रवृत्ताः एका
दशी विद्धा चेत् शुक्ले कृष्णे विशेषतः उत्तरां तु यतिः कुर्यात् पूर्वामुपवसेद्गृहीति नैवेतद्वाक्यं शुद्धाधि

Indira Gandhi National
Centre for the Arts

क्षयवशितार्थमिति शंकनीयं बाधकाभावेन विद्धाधिक्येपि तद्वचनप्रवृत्तेर्निवारयितुमशक्यत्वात्
द्वादश्याधिक्ये परेद्युरुपवासः तदाह व्यासः एकादशी यदा लुप्ता परतो द्वादशी भवेत् उपोष्या द्वादशी
तत्र यदीच्छेत्परमां गतिमिति उभयाधिक्येपि परेद्युरुपवासः एकादशी द्वादशी युक्ता वर्द्धमाने पि वर्ज
येत् क्षयमार्गस्थितस्तद्वत्कुर्वीत द्वादशीमपि तामिति उभयानाधिक्ये तु नास्ति संदेहः तदेवं स्मार्तनिर्ण
यसंग्रहः एकादशीद्वादश्योरुभयोर्वृद्धौ परेद्युरुपवासः द्वयोरप्यवृद्धौ पूर्वेद्युः एकादशीमात्रवृद्धौ
गृहपतिव्यवस्था द्वादशीमात्रवृद्धौ शुद्धा पूर्वा सिद्धान्तपरेति अत्राधिकारी निरूप्यते तत्र कूर्मपु
राणे एकादश्यां न भुंजीत पक्षयोरुभयोरपीति वानप्रस्थो यतिश्चैव शुक्लामेव सदा गृहीति तेन गृ ८

---

हस्थस्य शुक्लैकादश्यामेव नित्योपवासः नैमित्तिककाम्यौ तु कृष्णायामपि कार्यौ तत्र नैमित्तिकाः
स्मृत्यंतरे शयनीबोधनीमध्ये या कृष्णैकादशी भवेत् सैवोपोष्या गृहस्थेन नान्या कृष्णा कदा
चनेति काम्यस्तु मात्स्ये एकादश्यां तु कृष्णायामुपोष्या विधिवन्नरः पुत्रानायुः समृद्धिं च साय
ज्यं च स गच्छति तथा दिनक्षयेपि पुत्रवतो गृहस्थस्योपवासनिषेधः तथा च पितामहः एकाद
श्यां दिनक्षये उपवासं करोति यः तस्य पुत्रा विनश्यंति मघायां पिंडदो यथेति अतस्तत्रापि
विद्धक्षणीयं उपवासनिषेधं तु किं विद्धक्षं प्रकल्पयेत् न दुष्यत्युपवासेन उपवासफलं भवेत्
इति वायुपुराणात् नक्तं तत्रैवाह नक्तं हविष्यान्नमनोदनं वा फलं तिला क्षीरमथांबु वाज्यं च

संध्याग्यंयं दिवापि वायुः अज्ञातमात्रो नरस्तु नरंवेति तथा मार्कंडेये नारी खल्वननुज्ञाता भर्त्रापि
त्रा सुतेन वा निष्फलं तु भवेत्तस्या यत्करोति व्रतादिकमिति तथा मनुः पुष्पालंकारवस्त्राणि गं
धधूपानुलेपनं उपवासेन दुष्यंति दंतधावनमंजनमिति पुष्पोपवाससामर्थ्यो सर्वथा मनुकू
ल्पो मार्कंडेयपुराणे भक्तेन नक्तेन तथैवायाचितेन च उपवासेन दानेन न निर्द्वादशीको भवेदिति द
त्तात्रेयस्मृत्यंतरे उपवासासमर्थश्चेदेकं विप्रं तु भोजयेत् ज्ञानवद्धनिन्दनवादघाद्यङ्गकाढिग
णां भवेदिति सर्वथैवाशक्तो विष्णुरहस्ये असामर्थ्ये शरीरस्य व्रतेन च समुपस्थिते कारयेद्धर्मपत्नीं
वापुत्रं वा विनयान्वितमिति अथ प्रसंगाद्व्रतानि षिद्धानि कथ्यंते अगारा सायमाद्यंतरिरक्तौः सायं राम ३९

मातश्च मध्यमे उपवासफलं निस्पृशं जन्माङ्गकि चतुष्टयमिति बृहस्पतिराप दिवानिद्रां परान्नं वपुनर्भो
जनमैथुन क्षौद्रं कांस्यामिषं तैलं द्वादश्यामष्टवर्जयेदिति कूर्मपुराणेपि कांस्यं मांसं मसूरांश्च
चणकान्कोरदूषकान् शाकं मधुपरान्नं च त्यजेदुपवसन्स्त्रियमिति तथा सकृज्जलपानं च दि
वास्वपं च मैथुनं तांबूलं च वर्णोमासं वर्जयेद्व्रतवासरइति वाशिष्ठः उपवासे तथा श्राद्धे न खादे
दंतधावनं दंतानां काष्ठसंयोगो हंति सप्तकुलानि चेति उपवासदिने श्राद्धप्राप्तौ कात्यायनः
उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत् उपवासं तदा कुर्यादाघ्राय पितृसेवितमिति श्राद्धं
कृत्वा तु यो विप्रान् भुंक्ते पितृसेवितं हविर्देवानष्टकं तिकं च पितरस्तथेति वचनात् भोजनमा

Indira Gandhi National
Centre for the Arts

मेलदनुकल्पतया प्राणां विधीयते तत्रायं व्रतानुक्रमः दशम्यामेकभक्तं कृत्वा दंतधावनं कुर्यात्
दशम्यामेकभक्तं भुक्त्वा खादयेद्दंतधावनमिति स्मरणात् ततो दशमीरात्रौ नियमग्रहणं गृह
रिदिने सर्वेषो विधाय नियमं निशि दशम्यामुपवासस्य प्रकुर्याद्विलंबनमिति नियमास्तु नारदी
ये अक्षारलवणाः सर्वे हविष्यान्ननिषेविणः अवनीतल्पशयनाः प्रियासंगविवर्जिता इति ह
विष्याणि च हैमंतिकं सितास्विन्नं धान्यं मुद्गा यवास्तिलाः कलायकंगुनीवारा वास्तुकं हिलमो
चिकाः षष्टिकाः कालशाकं च मूलकं केमुकेतरत् लवणे सैंधवसामुद्रे गव्ये च दधिसर्पिषी पयोनुद्धृत
सारं च पनसाम्रहरीतकी तिंतिणीजीरकं चैव नागरंगकपिप्पली कदलीलवलीधात्रीफलान्यगुडमै रम ४०

क्षवं अतैलपक्वं मुनयो हविष्यान्नं प्रचक्षते इति स्मृतान्युक्तानि स्मृत्यंतरेपि हविष्येषु यवा मुख्यास्तद
नु व्रीहयः स्मृताः माषकोद्रवगौरादीन्सर्वलाभेपि वर्जयेदिति अग्निपुराणे व्रीहिषाष्टिकमुद्गाश्च क
लायाः सतिलं पयः श्यामाकाश्चैव नीवारा गोधूमाद्या व्रते हिताः कूष्मांडालाबुवृंताकपालकपाड्या
त्निकास्त्यजेत् मधुमांसं विहायान्यत् व्रते च हितमीरितं इति हेमंते भवं हैमंतिकं सितं श्वेतं तंडुल
पीतादिवर्णं तिलमाषिकाशाकविशेषः कालशाकं पूर्वादिशाप्रसिद्धं केमुकं कंदविशेषः तद्धाति
रिक्तं नागरं शुंठी लवली हर्फारेवडी इति प्रसिद्धा श्यामाकाकांगनीकौ गौरो गौरसर्षपः ततः ए
कादश्यां प्रातः संकल्पं कुर्यात् तथा च वराहपुराणे गृहीत्वौदुंबरं पात्रं वारिपूर्णमुदङ्मुखः उप

Indira Gandhi National
Centre for the Arts

~ग वासंतगृह्णीयाद्यद्दोर्यत धारयेदिति औदुंबरं ताम्रपात्रं गृह्णीयात् संकल्पयेत् तत्र मंत्रमाह विष्णुः एका
दश्यां निराहारः स्थित्वाहमपरेऽहनि भोक्ष्यामि पुंडरीकाक्ष शरणं मे भवाच्युत इत्युच्चार्य ततो विद्वान्पु
ष्पांजलिमर्थापयेदिति ततस्तत्पात्रगतं जलं पिबेत् अष्टाक्षरेण मंत्रेण त्रिर्जप्तेनाभिमंत्रितं उपवा
सफलेप्सुः पिबेत्पात्रगतं जलमिति विद्धैकादश्युपवासे रात्रौ संकल्पः विद्धोपवासे संकल्पं
दिनं त्यक्त्वा समाहितः रात्रौ संपूजयेद्विष्णुं संकल्पश्च तदाचरेत् इति नारदीयात् अर्द्धरात्रानंतरं द
शमीयुक्ता विद्धैकादशी तदा मध्याह्नोपरि संकल्पः दशम्यासंगदूषणात् अर्द्धरात्रात्परेण तु वर्जयेद्व्रत रामः
रायामां संकल्पार्चनयोरैसदेति वचनात् द्वादशीकर्तव्यमाह कात्यायनः प्रातः स्नात्वा हरिपू ४२

स्तदुपवासं समर्पयेत् अज्ञानतिमिरांधस्य व्रतेनानेन केशव प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भ
व मंत्रं जपित्वा ब्राह्मणे निवेद्य पारणां व्रती द्वादश्यां पारणं कुर्याद्द्वादशीं स्थित्वा ह्युपादकीमिति सूत
कादौ दानार्चनरहितमुपवासमात्रं कुर्यात् तदुक्तं कूर्मपुराणे काम्योपवासे संप्राप्ते त्वंतरा मृतसू
के तत्र काम्यव्रतं कुर्याद्दानार्चनविवर्जितमिति वराहपुराणे सूतके तु नरः स्नात्वा प्रणम्य मन
सा हरिं एकादश्यां न भुंजीत व्रतमेवं न लुप्यते मृतकेऽपि न भुंजीत एकादश्यां सदा नरः द्वादश्यां
तु समश्नीयात् स्नात्वा विष्णुं प्रणम्य चेति तत्र परित्यक्ते देवार्चनं मृतकांते कुर्यात् तदुक्तं मत्स्यपु
राणे सूतकांते नरः स्नात्वा पूजयित्वा जनार्दनं दानं दत्वा विधानेन व्रतस्य फलमश्नुते इति श्रीगार

Indira Gandhi National
Centre for the Arts

त्रि॰व शौदर्शनेपिव्रतस्यत्यागः किंतु देवार्चनादिरहितं सूतकादावपि उपवासमात्रं कार्यं तदाह पुलस्त्यः एका
दश्यां न भुंजीत नारी दृष्टे रजस्यपि इति अथ संगोपि संप्रवृत्तेपि रजसि नत्याज्यं द्वादशीव्रतमिति स
मवृतोपि शास्त्रदीर्घतपसां नाशनाय द्विजो भवेत् नतत्रापि व्रतस्यस्यादुपरोधः कदाचनेति शु
ध्यनंतरं देवार्चनादि कुर्यात् तथा च स्मृतिः स्नात्वा भर्तुश्चतुर्थेह्नि शुद्धा स्यात्परिचारणे पंचमेहनि
शुद्धा स्याद्दैवपित्र्य च कर्मणीति नित्योपवासप्रकाराणि पद्मरहस्येभिहितः अथ नित्योपवासी चेत्
सायंप्रातर्भुजिक्रियां वर्जयेत्सततं नृपः स्वप्यात् संप्राप्ते हरिवासरे इति ब्रह्मवैवर्तेपि इति विज्ञाय कुर्वीता ४२
वश्यमेकादशीव्रतं विशेषनियमासक्तो अहोरात्रं भुक्तिवर्जितः निगृहीतेन्द्रियः श्रद्धासहायो

विष्णुतत्परः उपोष्यैकादशीं पापान्मुच्यते नात्र संशय इति द्वादशीकृत्यमाह कात्यायनः प्रातः स्ना
त्वा हरिं पूज्य उपवासं समर्पयेत् अज्ञानतिमिरांधस्य व्रतेनानेन केशव प्रसीद सुमुखो नाथ ज्ञान
दृष्टिप्रदो भव मंत्रं जपित्वा हरये निवेद्य पापोषणं व्रती द्वादश्यां पारणं कुर्याद्वर्जयित्वाश्रुपादकी
मिति यद्वा द्वादश्यां श्रवणनक्षत्रे युक्तैकादशीमपि परित्यज्य द्वादश्यामेवोपवसेदित्याह अव
णेनयुतापि स्याद्द्वादशी सा हि वैष्णवी समोत्तमं चोपोषणीयास्यान्न देवैकादशी नरैः २२ त
था च नारदीये शुक्लावा यदि वा कृष्णा द्वादशी श्रवणान्विता तयोरेवोपवासः स्यात्त्रयोदश्यां
तु पारणमिति तयोः शुक्लकृष्णद्वादश्योः एतदुपवासद्वयसमर्थं प्रति असमर्थस्तूपवासद्व

Indira Gandhi National Centre for the Arts

यंकुर्यात् तदाचल्ललआज्ञानेनपारणं अपोश्नातितेन्नेवाशितंनैवानशितंभवतिश्रुत्याजलं
प्राशनस्यानशितानशितोभयरूपेणोक्तेः यदाचपारणादिनेकलामात्रंदंडमात्रंद्वादशीवा
द्वादशीतदातन्मध्यएवपारणाकार्या तदुक्तंनारदीये अल्पायामपिद्वादश्यामरुणोदये स्ना
नार्चनक्रियाःकार्याःदानहोमादिसंयुता महाहानिकरीह्येषाद्वादशीलंघितानृणां करोतिधर्मह
रणमस्नातेवसरस्वतीति स्कांदेपि यदाभवेदतीवाल्पाद्वादशीपारणादिने उषःकालेद्व
यंकुर्यात्प्रातर्मध्याह्निकंचतत् इति उपवासव्रतादन्यव्रतेसार्द्धमुहूर्तकैः सप्तभिर्दशमीवि रामः
द्धाविनाएकादशीत्यजेत् ५४ तथाचद्वादशीकल्पे पूर्णाविद्धादिनार्द्धेनदंडानामपि ५३

स्त्यजेत् यदीक्षुदात्मसंतानंनियमेनचतुर्द्दशीपीति नपोषितंचनक्षीचैनेकभक्तमयाचितनंदायां
पूर्णाविद्धायांकुर्यादैश्वर्यमोहितइति दिनार्द्धेनसार्द्धसप्तमुहूर्तैरित्यर्थः अतएवादिकपंच
दशाभिस्तथैतिप्रागुदाहृतं इतोन्यूनवेधत्तुतिथ्यंतरवन्मध्याह्नादिव्याप्त्यानिर्णयइतिसंक्षे
पः इत्येकादशीनिर्णयः अथद्वादशीनिर्णयमाह द्वादशीपूर्वविद्धैवनिखिलेषुव्रतेष्वपिरु
द्रेणद्वादशीयुक्तेतियुग्मवाक्यादित्यर्थः अथश्रवणद्वादशीनिर्णयमाह अत्रद्वादश्यां
स्यश्रवणयोगेपिश्रवणद्वादशीप्रोक्तमुपवासादिभवति द्वादशीश्रवणस्पृष्टाकृत्स्ना
पुण्यतमातिथिः नतुसातेनसंयुक्तानावत्स्यैवप्रशस्यतइति तत्रविद्धाधिकादिनद्वये

Indira Gandhi National
Centre for the Arts

श्रवणयोगे एकादशीयुता या त्वा द्वादशी श्रवणस्पृष्टा स्पृष्टामेकादशी यदि स एव वैष्णवो योगो विष्णुशृं
खलसंज्ञितः उपोष्य विधिवत्तत्र नरः संक्षीणकिल्बिषः प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभामि
ति भाग्स्यात् तत्रैव तदा एकादशीद्वादशीप्रयुक्तमुपवासद्वयम् तत्रैव यदा श्रवणमेकादशी स्पृ
ष्ट्वा द्वादशी स्पृशति तदा तिथ्याधास्त्यमुक्तं नारदीये संस्पृश्यैकादशी राजन्द्वादशी यदि संस्पृशेत् श्रव
णं ज्योतिषां श्रेष्ठं ब्रह्महत्यां व्यपोहतीति यदा शुद्धाधिकाया दिनद्वयेपि श्रवणयोगः सर्वोत्तरदिन ए श्री २
एव उदयकालीनस्तदोत्तरा ग्राह्या तथा च बृहन्नारदीये उदयव्यापिनी ग्राह्या श्रवणद्वादशी व्रत इति राम
यदा तु द्वादश्याः श्रवणयोग एव नास्ति किंतु एकादश्या एव तदा तस्यामपि श्रवणद्वादशीप्रयुक्तं व्रतं ४५

कार्यं तदुक्तं नारदीये यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्णवं क्वचित् एकादशी तदोपोष्या पापघ्नी श्रव
णान्वितेति विद्धाधिकाया अपि तत्र दिने श्रवणयोगाभावे श्रवणयोगवती विद्धापि ग्राह्या
दशम्येकादशी यत्र सा नोपोष्या भवेन्नृप श्रवणेन तु संयुक्ता सा शुभा सर्वकामदेति वह्निपुरा
णात् तदाप्येकादश्युपवासस्यैतत्सदृशत्वमेव यदा त्वेकादशीद्वादश्युपवासो दिनभेदेन प्रा
प्नुतस्तदा शक्तेन द्वयमपि कर्तव्यं एकादशीमुपोष्यैव द्वादशीमप्युपोषयेत् न तत्र विधिलोपः
स्यादुभयोर्देवतं हरिरिति भविष्योत्तरात् यत्तु द्वादश्यां तर उपसंक्रान्त कति विहर्षव्यापि श्रवण
द्वादशीव्रतयोग उपवासद्वयासमर्थो निश्चयाद्वक्ते नैकादशीव्रतसंकल्पः पश्चात्तत्रासमर्थः

Indira Gandhi National
Centre for the Arts

ससंकल्पितमेकादश्युपवासं विधाय श्रवणद्वादश्यां तत्प्रयुक्तं विष्णुपूजादिकं विधाय भुंजी
त संकल्पबाधप्रसंगाच्छास्त्रविरोधप्रसंगाच्च तदुक्तं मत्स्यपुराणे द्वादश्यां भुक्त्वा भक्षेत
न्नक्षत्रं श्रवणं यदि उपोष्यैकादशीं तत्र द्वादश्यां पूजयेद्धरिम् इति हरिपूजामेव कुर्यान्न तु
पवासमित्यर्थः उपवासाकरणेन तद्दिने हरिपूजायाः प्राप्तत्वादेतादृशविधेयर्थ्यात् परन्तु द्वादश्युः
प्रागेवानिश्चितोपवासद्वयासामर्थ्यः सकाम्यनित्यस्य बाधकाभिनिन्यापेन श्रवणद्वादश्या
मेवोपवासं कुर्यात् तदुक्तं नारदीये उपोष्य द्वादशीं पुण्यां विष्णुनक्षत्रसंयुताम् एकादश्युद्भवं पु
ण्यं नरः प्राप्नोत्यसंशयं वाजपेयेन तथा यज्ञकर्महीनोपि दीक्षितः सर्वफलमवाप्नोति श्रवणस्नाना एम: ४५

प्यकृतोपि समाप्नोति तथावन्नैवोपसंहरंति एवमेकादशीमुक्त्वा द्वादश्यां समुपोषणात् पूर्ववासर
जं पुण्यं सर्वमाप्नोत्यसंशयमित्युक्तं पारणं तु व्रतसंबंधि पारणादिने भयाभिवृत्तेरुभयांत इति
मुख्यः पक्षः अन्यतरांत इति गौणः इयं श्रवणद्वादशी बुधवासरयुक्तातिप्रशस्ता श्रवणद्वादशीयं
गेद्बुधवारे यदा भवेत् अत्यंतमहती तस्यां द्वादश्यपसम्यकीर्तितेति विष्णुधर्मोत्तरे भाद्र्यत्यंतफल
दा मासि भाद्रपदे शुक्लद्वादशी श्रवणान्विता अत्यंतमहती तस्यां दत्तं भवति चाक्षयमिति स्कंदपु
राणात् अस्यां संगवस्नानादिकं कार्यं स्नानं जप्यं तथा दानं होमं श्राद्धं सुरार्चनं सर्वमक्षय्यफल
दं तस्यां भृगुकुलोद्वह तस्मिन्नेव दिने यस्तु स्नातः कुवनसंगमे सगंगास्नानजं पुण्यं फलं प्राप्नोत्यसं

Indira Gandhi National
Centre for the Arts

यं श्रवणसंगमाः सर्वपरस्पृष्टिसदासदा विद्धायाद्वादशीयुक्तेबुधवारविशेषणइतिविष्णुधर्मोत्तरात
इतिद्वादशीनिर्णयः अथत्रयोदशीनिर्णयमाह शुक्लेत्रयोदशीपूर्वापराकृष्णात्रयोदशी पू५
त्रयोदशीसकर्त्तव्याद्वादशीसहितामुनेइतिब्रह्मवैवर्त्तात इदंचशुक्लत्रयोदशीविषयकमेव घ
ष्टमीअमावास्याकृष्णपक्षेत्रयोदशी एताःपरयुताःपूज्याःपराःपूर्वयुतास्तथेति निगमेकृ
ष्णत्रयोदश्याःपरविद्धत्वोक्तिः अलाभेसापिपूर्वैवपूर्वानंगत्रयोदशी द्वितीयदिनेत्रिमुहूर्त्ताला
लेसापिकृष्णापि अनंगत्रयोदशीमार्गशीर्षकृष्णत्रयोदशीपूर्वानंगत्रयोदशीरंभात्रयोदश्या राम
पूर्वसंयुताइतिविद्धायनापिसंवर्त्तोक्तिःयाशुक्लाशुक्लपूर्वागृह्यतासापराह्णिकी ४६

योदशीसकर्त्तव्यायाभवेदापराह्णिकीतिस्कांदात्इत्यर्थः इतित्रयोदशीनिर्णयः चतुर्दशीनिर्णयमाह
चतुर्दश्युत्तराशुक्लापूर्वाकृष्णाचतुर्दशी चतुर्दश्यापूर्णिमेतियुग्मवाक्यात् कृष्णपक्षेऽष्टमीचैवकृ
ष्णपक्षेचतुर्दशी पूर्वविद्धातुकर्त्तव्यापरविद्धानकर्हिचित् इत्यापस्तंबवचनाच्चेत्यर्थः उदयाद्विमु
हूर्त्तापिग्राह्यानंतव्रतेथितिः ८७ भाद्रपदचतुर्दश्यामनंतव्रतं तत्रमध्याह्नव्यापिनीग्राह्या मध्या
ह्नेभाद्रपदेलायांसमुनेर्यमुनातटे ददर्शशीलासास्त्रीसमूहान्रक्तवाससः चतुर्दश्यामर्चयंतंभ
क्त्यादेवंपृथक्पृथक् इतिहासदर्शनादितिकेचित् तन्निरासार्थमिदमुच्यते दैवेत्वौदयिकीग्रा
ह्येतिवचनेनउभयस्त्राण्याहादिभिश्चौदयव्यापिन्यास्त्रिमुहूर्त्तायाद्विमुहूर्त्तायावाग्रहणमुचितं इ

तिहासेन मध्याह्नस्य विधानाभावात् तत्कल्पनस्य च प्रत्यक्षवचनविरोधेनानुचितत्वादिति भावः अपवा
दमाह शुक्लापि रात्रियुक्तास्यां चेत् श्रावणमासयोः यथा श्रावणमासस्य शुक्लायां तु चतुर्दशी।
सा रात्रिव्यापिनी ग्राह्या परा पूर्वाह्णगामिनी इति बोधायनोक्तेः परा मासान्तरवर्तिनी शुक्लचतुर्दशीत्य
र्थः क्वचिदपवादमाह शुक्ला सर्वापि पूर्वैव यदि स्यादपराह्णिकी पूर्वदिने पराह्णव्यापित्वात्
शुक्लचतुर्दश्यपि पूर्वैवेत्यर्थः तदुक्तं स्कान्दे चतुर्दशी तु कर्तव्या त्रयोदश्या युता विभो मम भक्तैर्म
हाबाहो भवेद्यावापराह्णिकी दर्शविद्धा न कर्तव्या राका विद्धा कदाचनेति अत्र मम भक्तैरिति लि
ङ्गात् शिवचतुर्दशीविषयत्वं द्रष्टव्यं अथ शिवरात्रिनिर्णयमाह प्रदोषव्या निशीथव्याप्या वा एम: ४१

या सिमा भवेत् शिवरात्रिव्रते तद्द्वयोः समासमव्याप्ते ९९ तदभावे निशीथैकव्यापिनी परिगृह्यतां तस्या असं
भवे ग्राह्या प्रदोषव्यापिनी तिथिः प्रदोषेति त्रयोदश्यस्तगते सूर्ये चतसृष्वेव नाडिषु भूतविद्धा तु या तत्र शिव
रात्रिव्रतं चरेत् इति वायुपुराणात् प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्दशी रात्रौ जागरणं यस्मात् तस्मा
त्तां समुपोषयेत् इति स्मरणाच्च निशीथे बोधनारदीये अर्द्धरात्रयुता यत्र माघकृष्णचतुर्दशी शिवरात्रिव्रतं तत्र
सोऽश्वमेधफलं लभेदिति तथा माघकृष्णचतुर्दश्यामादिदेवो महानिशि शिवलिङ्गतयोद्भूतः कोटिसूर्य
समप्रभः तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिरिति ईशानसंहितोक्तेश्च एवं सति एकस्मिन्नेव दि
ने प्रदोषनिशीथोभयव्यापिनी तत्र व्रतं कार्यं दिनद्वये तूभयव्याप्तिस्तदभावो वा सांशभवा यदा पूर्वेद्युर्निशी

Indira Gandhi National
Centre for the Arts

थव्याप्तिः परेद्युः प्रदोषव्याप्तिस्तत्र त्रयोदशीयोगस्य प्रशस्तत्वात्पूर्वैव तदुक्तं स्कांदे जन्माष्टमी रोहिणी च
शिवरात्रिस्तथैव च पूर्वविद्धैव कर्त्तव्या तिथिभांते च पारणमिति तथा पद्मपुराणे अर्द्धरात्रात्पुरस्तात्त्व
ज्जयायोगो यदा भवेत् पूर्वविद्धैव कर्त्तव्या शिवरात्रिः शिवप्रियैरिति यदा पूर्वेद्युर्निशीथादूर्ध्वं समाप्ता
परेद्युः क्षयवशान्निशीथादर्वागेव समाप्ता तदा पूर्वेद्युः प्रदोषनिशीथव्याप्त्यारम्भेयारप्यसंभवात्परेद्युः प्र
दोषव्याप्तेरकस्यासंभवाच्च परविद्धैव ग्राह्या तदभिप्रेत्य स्मर्यते माघासिते भूतदिने कदाचिदुपैति यो
गं यदि पंचदश्याः जयाप्रयुक्तां न तु जातु कुर्याच्छिवस्य रात्रिं प्रियकृच्छिवस्य यदा पूर्वेद्युः प्रदोषादूर्ध्वं रा.प
प्रवृत्ता चतुर्दशी परेद्युः क्षयवशात्प्रदोषात्पूर्वमेव समाप्ता तदा पूर्वेद्युरेव निशीथव्याप्तत्वात्साग्राह्या एव ४८

च दिनद्वयेपि निशीथव्याप्तौ तदव्याप्तौ च प्रदोषव्याप्तिर्नियामिका दिनद्वयेपि प्रदोषव्याप्तौ तदव्याप्तौ च नि
शीथव्याप्तिर्नियामिका एकस्मिन्दिने एकैकव्याप्तौ जयायोगो नियामक इति पारणानिर्णयमाह
तिथ्यंते पारणं यामत्रयादर्वाक्समापने अन्यथा पारणं प्रातरन्यानि तूपवासवत् ११ कृष्णाष्टमी स्कंद
षष्ठी शिवरात्रिचतुर्दशी एताः पूर्वयुताः कार्यास्तिथ्यंते पारणं भवेदिति स्कांदवचनस्य उपोषणं चतुर्द
श्यां चतुर्दश्यां च पारणं कृतैः सुकृतलक्षैश्च लभ्यते वाथवा नवेत्यस्य चैवं व्यवस्थेत्यर्थः पंचदशीनिर्ण
यमाह पूर्वविद्धैव सावित्रीव्रते पंचदशी तिथिः भूतविद्धा न कर्त्तव्या अमावास्या च पूर्णिमा वर्जयित्वा
मुनिश्रेष्ठ सावित्रीव्रतमुत्तममिति ब्रह्मवैवर्तात् यदा त्वष्टादशदण्डा चतुर्दशी तदा सावित्रीव्रतमपि परैव

Indira Gandhi National
Centre for the Arts

त्याह नाप्नोष्टादशाभूतस्यस्युश्चेत्तत्रपरेहनि २२ भूतोष्टादशनाडीभिर्दूषयंत्युत्तरांतिथिमितिवचनादिति
भावः व्रतांतराणितुपरविद्धायामेवेत्याह व्रतांतराणिसर्वाणिपरेह्नयेवसर्वदा   श्राद्धनिर्णयमाह
श्राद्धपराह्णकालीनादर्शाश्चाब्दिकवन्मत २३ अपराह्णःपितॄणामितिवचनादित्यर्थः दिनद्वयेप्येकेद
शेनैकतोवाशोमहत्वतः अपराह्णैकदेशेदिनद्वयेपिसत्तोव्याप्तौ अधिकैकदेशव्यापिनीग्राह्येत्यर्थः एकदेश
समव्याप्तौ आह तुल्यत्वेचेत्दशेतुक्षयेपूर्वान्यथोत्तरा २४ खर्वादिवचनादितिभावः कृत्स्नव्याप्तौह्यो
रक्षोरुत्तरातिथिवृद्धितः दिनद्वयेपिसकलापराह्णव्याप्तौतिथिवृद्धिवशादुत्तरेत्यर्थः साग्निकनिरग्निव्य
वस्थास्यात्स्याच्चेदपराह्णयोः पूर्वेद्युःसाग्निकःकुर्यादुत्तरेद्युर्निराग्निकः २५ उभयत्राप्यपराह्णस्पर्शाप ४९

साग्निकानग्निकव्यवस्थाभवेत नोभयत्रायदि पूर्वेद्युरिति तदाहजाबालिः अपराह्णद्वयव्यापियदिदर्शति
थिक्षये आहिताग्निःसिनीवालीनिरग्न्यादेःकुहूर्मतेति सिनीवालीदृष्टचंद्राप्रथमैवकुहूर्नदृष्टचंद्रा अत्रेत्य
र्थः निरग्न्यादेरित्यादिपदातच्छीशूद्रयोरपिग्रहणं तथाचलौगाक्षिः सिनीवाली द्विजैःकार्याःसाग्निकैःपि
तृकर्मणि स्त्रीभिःशूद्रैःकुहूःकार्यातथाचानग्निकैर्द्विजैः इतिपंचदशीनिर्णयः अथेष्टीपर्वनिर्णयमाह
पर्वप्रतिपदोःसंधिर्मध्याह्नात्तःपरा अन्वाधानंपूर्वदिनेयागःसंधिदिनेभवेत २६ ऊर्ध्वंमध्याह्नतःसंधा
वन्वाधानंतुतद्दिने इष्टिंपरादिनेकुर्यादित्यवाजसनेयिनः २७ अन्वाधानमग्निपरिग्रहणरूपोयागारंभः पूर्व
द्युरग्निंगृह्णातिउत्तरमहस्तत्तरमहर्यजतीतिशतपथश्रुतेः यद्यपिसंधौयजेतेतिश्रुत्यासंधिकालएवया

Indira Gandhi National
Centre for the Arts

गकालः प्रतीयेत तथापि संधिमभिसंधायैतेन निरुक्तः संधिपूर्वापरकालयोगप्रयोगकालः अतएवाधायनः
सूक्ष्मत्वात्संधिकालस्य संधावित्ययुक्तमत सामीप्यविषयं प्राह पर्वणा इत्यपरेणापि सन्निव शीतं । आनाय
वत्सस्य यागस्य वक्तराश्विदुः द्वावंशादूर्ध्वं अदन्यो यागवत्रतकर्मणो नि भागाक्षिलवनात्पर्वणो वाथवेषा
पर्वलस्यान्वाधानस्य कालः यागस्य वल्सारोत्राः पर्वतनुथोत्राप्यारभ्य प्रतिपदर्धप्रयोगकालः अन्वाधान
पर्वतनुथोत्रावस्थः यागतत्र प्रतिपत्तुर्योत्रावस्थः पदाप्रतिपदासंपूर्णतिदानतत्संदेहः तदनन्तरं यागः
सिः पूर्वाह्णे वाथ मध्याह्ने यदि पर्व समाप्यते उपाख्यातत्र पर्वद्युग्रनदूर्ध्वं यागइत्यादि अथवापराह्णेश्वयागोश्वा गमः
यादि पर्वसमाप्यते उपाख्यतस्मिन्नहनि श्वोभूते यागइत्यन्तरालेति उपाख्य अन्वाधापनार्थः अतएवमथवा ४०

ध्याह्नादिश्रद्धायोगिकाः ननु पर्वधाविभागाश्चप्रपातपारिभाषिकाः तेनाह्नोमध्यमध्याह्नइति योगनावर्ते
नेमध्याह्नइत्यर्थः तस्यैवाररभागोपूर्वाह्णापराह्णौ प्रोक्तौ अयं तनिर्णयोमाध्यंदिनीयभिन्नानामित्याह
अन्यत्र इति वाजसनेयिभिन्नानामित्यर्थः वाजसनेयिनं प्रत्याह यस्तुवाजसनेयीस्यात्तस्य संधिर्दिनाद्य
ग नवाप्यन्वाहितैः किंतु सदासंधिर्दिनाहित्या ४८ अतएवतत्स्मारस्यार्थसंग्रहकारः मध्याह्नादिनात्याद्दूर्ध्वं
यत्प्रतिपत्सत्वाकर्मणाः संधिर्दिवाकीया मायवर्षिका वाजसनेयिमत्यान्तस्याप्रवेशाध्यायपरद्वाराशइरानि
प्रार्तेर्नेनाहस्यमस्तमयादर्वाक्प्रदासंधिभवतीतदाह संधिमती तिथिः प्रथमा रात्रौ संधिरन्याति थार्द्धं ती
या उभेअपरस्य पूर्वाह्णे संधिमती पवतिथिस्तीयारवर्षिकाभवति तस्मात् तीयातिथौ पर्वकालस्याल्प

गकालः प्रतीयेत तथापि संधिमभितो यजेतेति श्रुतेः संधिपूर्वापरकालयागप्रयोगकालः अतएव बोधायनः
सूक्ष्मत्वात्संधिकालस्य संधेर्विषयउच्यते सामीप्यं विषयं प्राहुः पूर्वेणाह्ना परेण वा इति एवं च त्रीनि। आनोप
वृतस्य यागस्य चतुरो विदुः द्वावंशावादुस्तेजदंत्यौ यागवत्रनकर्मणीति भोगाक्षिवचनात्पार्वणोद्देशाय यमो
पवस्तस्यान्वाधानस्य कालः यागस्य चत्वारोंशाः पर्वचतुर्थांशामारभ्य प्रतिपदंशत्रयं कालः अन्वाधाने
पर्वचतुर्थांशोवर्ज्यः यागे च प्रतिपत्तुर्यांशोवर्ज्यः यदा प्रतिपदोः संपूर्णत्वं तदा नैव संदेहः खंडत्वे तु लौगा
क्षिः पूर्वाह्णेवाथमध्याह्नेयदिपर्वसमाप्यते उपोष्यात्रपूर्वेद्युस्तदहर्याग इष्यते अपराह्णेथवारात्रौ राम: १०
यदिपर्वसमाप्यते उपोष्यनास्मिन्नहनि श्वोभूते याग इष्यतइति उपोष्य अन्वाधायेत्यर्थः अत्रमध्या

ध्याह्नादिव्याख्यायौगिकाः ननु पंचधाविभागाश्रयणेन पारिभाषिकाः तेनाह्नोर्मध्यं मध्याह्न इति योगेनावर्त्त
नेमध्याह्नशब्दार्थः तत्पूर्वोत्तरभागौ पूर्वाह्णापराह्णशब्दार्थौ अयं च निर्णयो माध्यंदिनीयभिन्नानामित्याह
अन्यतइति वाजसनेयिभिन्नानामित्यर्थः वाजसनेयिनं प्रत्याह यत्तु वाजसनेयी स्यात्तस्य संधिर्दिनात्
रा न चाप्यन्वाहितिः किंतु सदा संधिर्दिनेहसा १८ अतएव च तद्व्याख्यार्थसंग्रहकारः मध्यंदिनात्स्यादहनी
ययस्मिन्ना कर्मणः संधिरियं ततीया सावधिका वाजसनेयिमतेन तस्यामुपोष्याथ परेद्युरिष्टिरिति
आवर्तनादूर्ध्वमस्तमयादर्वाक् यदा संधिर्भवति तदाह साधिमतानि तिथिः प्रथमाराज्ञो संधिश्चेत्सा तिथिर्दिनी
या उभेऽप्यपेक्ष्य पूर्वाह्णे संधिमती पवतिथिस्तृतीया सावधिका भवति तस्यां ततीयातिथौ पर्वकालस्याल्प

Indira Gandhi National
Centre for the Arts

न्वाधारखर्वविकाल्पेनुक्तेन शाखांतराध्यायिनामीदृशो विषये पूर्वेद्युरन्वाधानादिकं संधितिथाविष्टिः वाज
सनेयिनां तु संधितिथावन्वाधानं उत्तरतिथाविष्टिः एवं सति वाजसनेयिनां नक्कापि संधिदिनात्पूर्वेद्युर
न्वाधानादिकमस्ति सोयं विशेषः सोयं विशेषश्चावर्तनेन ततः पुरावा परा संधिर्भवति तदा वाजसनेयिभ्य
तिरिक्तानां पर्ववतुर्थांशे दृष्टिः प्राप्नोति तत्र विशेषमाह भार्गवः प्रतिपद्यग्रविष्टायो यदि विष्टिं समाप्यते
पुनः प्रणीय कुर्वीत दृष्टिः कर्तव्या यागविन्नभेदइति नन्वपराह्णे संधौ प्रतिपच्चतुर्थांशस्य यागकालं प्राप्नोति
तद्वा निषिद्धं नयस्य संवतुर्थांशे यागः प्रतिपदक्क वित् रक्षांसि न दहति पंनौ श्रुतिरेषा सनातनी स्मृतेः अतस्ता
दृशे विषये यागः एव लुप्येतेति चेन्मैवं वृद्धशातातपेन प्रतिप्रसवाभिधानात् संधिर्यद्यपराह्णे स्याद्याग एप: ५२

---

प्रातः परेहनि कुर्वाणाः प्रथमे भागे चतुर्थे पि न दुष्यतीति एवं तर्हि एवं तर्हि प्रतिषेधो निर्विषयः स्यादिति चेन्मैवं
सद्यकालविषयत्वरितार्थत्वान्नदाह कात्यायनः संधिश्चेत्संगवादूर्ध्वं प्राक्चेदावर्तनाद्रवेः सा पौर्णमासी तु वि
ज्ञेया सद्यःकालविधौ तिथिरिति अनेन संधिदानात्पूर्वेद्युः प्रातरन्वाधानं संधिदिने इष्ट्येत नेदनदाह संधिश्चे
त्संगवाद्विधोतिथिः ९९ संधिर्निर्णयश्च न यथास्थितरीत्याकिंत्वेवमित्याह शंकः प्रतिपदो यावत्तदर्धं पर्वं
णि क्षिपेत् क्षयस्यार्धं तथा हित्वा संधिर्निश्चीयते सदा १०० तिथिः परस्तात् घटिकाश्च यास्तु न्यूनानि चेद्वा
प्यधिकास्तु तासां अर्द्धं वियोज्यैव तथा प्रयोज्यं क्षोस वृद्धौ प्रथमादिने न दिनिवचनादित्यर्थः अमावा
स्यायां विशेषमाह शातातपः द्वितीयात्रिमुहूर्तो विप्रतिपद्यापराह्णिकी अन्वाधानं चतुर्दश्यां परतः सो

Indira Gandhi National
Centre for the Arts

मद्दर्शनानन्दस्विति सोयंविशेषोनाश्वलायनापस्तंवविषयः किंतुवोधायनमतानुष्ठीयविषयइत्याह वोधायनमते
तेदर्शश्राद्धंवोष्टिर्विशिष्यते द्वितीयायांत्रिमुहूर्तोचेदस्तनिघापराह्णिकी २ अन्वाधानंचतुर्दश्यांदर्शोस्वल्पेपि
वर्जयेत् दर्शश्राद्धंतदाकार्यमितिवोधायनोदितं २ अतएववोधायः द्वितीयात्रिमुहूर्ताचेदस्तमितिपघापराह्णि
की अन्वाधानंचतुर्दश्यांपरतःसोमदर्शनात् चतुर्दशीचतुर्वैर्यामा अमावास्यानदृश्यते भ्योभूतेप्रतिप
द्येस्यात्सर्वांतत्रैवकारयेत् चतुर्दशीनुसंपूर्णाद्वितीयाक्षयगामिनी चतुर्थीघटिकामात्रंस्याद्भूतकव्यादिकी
क्रियेति एतेषांवचनानामयमर्थः आद्यचतुर्दशीसंपूर्णा अस्तमयादर्वागमावास्यास्वल्पापिनतएवा
पराह्णव्यापिभावात् आद्यायांन्वाधीनापवार्णदर्शकरीत्या यद्यपितन्निमित्तभाववंनभजते तथापिप्रतिपा राम: ५२

द्द्वितीयायांसत्यांवर्धमानत्वात्तद्दिनेशेषेतिथिद्वयत्वात्प्रतिपद्युतायाममावास्यायामिष्टिः स्वल्पामावा
स्यापेतायांचतुर्दश्यांश्राद्धान्वाधानादिकंकर्तव्यमिति तथावबोधायनोक्तं यदाचतुर्दशीयामंतुरीयमनु
पूरयेत् अमावास्याक्षीयमाणातदेवश्राद्धमिष्यतइति चंद्रदर्शनोपेतायांअल्पप्रतिपदियागानुष्ठाने
प्राप्तश्चिन्त्यमाहकात्यायनः यजनीयेह्निसोमश्चेद्वारुण्यांदिशिदृश्यते तत्रव्याहृतिभिर्हुत्वादंडदधाद्विजा
तयइति स्मृत्यंतरेपि अर्वागस्तमयाद्यत्रद्वितीयातुप्रदृश्यते तत्रयागंप्रकुर्वीतविश्वेदेवाःपराङ्मुखाइति प
तुयदह्नः पश्चाच्चंद्रमाभ्युदितनदहर्यजन्निमांलोकान्भ्युदितीतिश्रुतिवचनंचंद्रदर्शनदिनोपयागकर्तव्यतावो
धकंतद्बोधायनातिरिक्तविषयं इतिपक्षतिनिर्णयः अथविकृतिकालोनिरूप्यते इष्ट्यादिविकृतिःसर्वा

पर्वण्येवेति निर्णयः आश्विनाप्लुयागानिर्णय: पर्वण्येवेति यद्यप्युक्तनासोमेनवायजेत सोमावा
स्यायांपौर्णमास्यांवायजेतिवचनेनश्रद्धकालस्तस्यबाधादित्यर्थः तत्रविशेषंकात्यायनोक्तः आवर्त
नाआकृयद्विवर्षसंधिःकृत्वातुतस्मिन्प्रकृतिंविकृत्याः तत्रैवयागःपरतोयदिस्यात्तस्मिन्विकृत्याःप्रकृतेःपरेद्यु
रिति आवर्तनेनतःपूर्णवापर्वसंधौसंधिदिनेप्रकृतिंकृत्वापश्चाद्विकृतिःकर्तव्या: यथावर्तवर्तनात्परतःसंधिः
तदाकेवलविकृतियागःसंधिदिनेकर्तव्यः प्रकृतियागस्तुसंधिदिनात्परेद्युरनुष्ठेयइत्यर्थः आवर्तनेनतःपूर्व
कालेनतःपरकालेवासंधिरित्यनेनसंधिदिनएवविकृतेरनुष्ठानं प्रकृतस्तुपूर्वोक्तरीत्यासंधिदिनपरेद्युर्वानु
ष्ठानंभवतिष्ठतइति इतिविकृतिकालनिर्णयस्यचतुर्थप्रकरणंसंपूर्णं पंचप्रकरणार्थमाह पर्वमतप्रक एम ५२

रणेपूर्वार्द्धेभादिवविनिर्णयःउत्तरार्द्धेकालभेदात्कर्मभेदोपदर्शनं तत्रपूर्वार्द्धेनक्षत्रादिनिर्णयः आश्विनायागकरणानि
र्णयः संग्रहः उत्तरार्द्धेतुकालविशेषणकर्मविशेषणनिरूपणमित्यर्थः यस्मिन्नस्तमियाद्भानुस्तन्नक्षत्रमुपोषणा
मुख्यतस्यामभवेत्तुगृहीतव्यंनिशीथयुक् नक्षत्रस्यदिनद्वयेपिसत्वेयस्मिन्दिनेअस्तमयव्याप्तिस्तत्रतन्निमित्त
कृत्वोपवासःकार्यः अयंमुख्यपक्षः तदसंभवेतुनिशीथव्यापिग्राह्यमित्यर्थः उपाधितेनक्षत्रंयस्मिन्नभियाद्रविः ५४
युज्यतेयत्रवारामनिशीथव्याप्तिनासहेतिविष्णुधर्मोत्तरात अस्तमयनिशीथोभययोगित्वनियामत्वं एवंचयदा
पूर्वेद्युःकेवलनिशीथयोगःपरेद्युश्चकेवलोस्तमययोगस्तदापरेद्युरेवोपवासः निशीथव्याप्तियोगस्तुष्टोति
शास्त्रप्रसिद्धएवबोध्यः नतुलौकिकः दिनद्वयेप्यस्तमययोगाभावेनिशीथयोगेपूर्वेद्युरेवोपवासः उपवासप
दस्यात्राहुनैकैकभक्तयोः उपवासप्राशस्त्यंनिर्णयस्नाद्यानक्षत्रनिर्णयस्नाद्यास्यवनैकैकभक्तयोः

नत्रप्रदोषमध्याह्नव्याप्तिः उपवासेयद्दर्शः स्यात्तद्दिनेकैकभक्तयोः रात्रिस्वांशात् उत्स्यइति तस्योत्रिमुहूर्तस्थंनक्ष
त्रंव्रतदानयोः तथाचविष्णुधर्मोत्तरे यातिथिस्तच्चनक्षत्रंयस्यामभ्युदितोरविः तथाकर्माणिकुर्वीतह्रासवृद्धी
नकारणमिति एतच्चपारिशेष्याद्दानादिविषयं उभयत्रतथात्वेतुपूर्वंस्याहूलवत्वतः दिनद्वयइत्यर्थः तथात्वेउ
दयव्यापित्वे बलवत्वतः संपूर्णान्द्रोरात्रिव्यापित्वात् श्रवणात्तूत्तरंग्राह्यमुकरणकर्मणि ६ धनिष्ठासहि
तंकुर्याच्छ्रावणंकर्मयद्भवेत् तत्कर्मसफलंकुर्यंवंद्यादुपाकरणसंज्ञकमितिवचनात् पित्र्येतुतिथिवत्सर्वो
नक्षत्रस्यविनिर्णयः अपराह्णव्याप्तिवशादित्यर्थः योगनिर्णयमाह पूर्वः स्यादुपवासादौत्तरोव्रतदानयोः
योगश्राद्धकर्मकालव्याप्तस्तुपरिगृह्यतां पूर्वद्युरुभयव्याप्तौग्राह्यः निशीथमात्रव्याप्तिस्तुनक्षत्रवन्नक्षत्र एम
वन्नग्राह्यः प्रमाणाभावात् व्यतीपातपारस्तस्याहत्यपवग्रंथत्रेणोक्तत्वाच्च केवलनिशीथव्याप्तियहणस ५४

भवायोगादितिबोध्यम् व्रतदानयोरुत्तरोग्राह्यः श्राद्धेत्वपराह्णव्याप्तः करणंयद्दिनेनतुरात्रौग्राह्यंतदासदा दिनद्व
येप्येकभक्ताभ्यामुपवासः प्रसिध्यति ७ ववबालवादिकरणंतिथ्यर्द्धमितत्वाद्दिनद्वयाव्याप्तित्वेनासंदेहाद्यस्मिन्दि
नेकरणसद्भावस्तद्दिनएवतत्कर्मकार्यं यदातुसायंसंध्यामारभ्यपरेद्युरुदयात्प्रागेवकरणंसमाप्येततत्रकथमि
तिचेद्भद्राकरणोक्तन्यायेनसर्वकरणेषुनिर्णयइतिब्रूमः भद्राकरणेचनिर्णयोभविष्योत्तरे भद्राव्रतेचपच्यते
यस्मिन्दिनेभवेद्भद्रातस्मिन्नहनिभारत उपवासस्यनियमंकुर्यान्नारीनरोपिवा यदिरात्रौभवेद्दृष्टिरेकभक्तं दि
नद्वये कार्यंतेनोपवासः स्यादितिपौराणिकोविधिः प्रहरस्योपरियदास्याद्दृष्टिः प्रहरत्रयम् उपवासस्तदाकार्यो
एकभक्तंततोन्यथेति उदयादारभ्ययावदस्तमयंदृष्टिस्तस्यांनास्त्युपवाससंदेहः यदाप्रहरमात्रंदृष्टिर्नास्ति

Indira Gandhi National
Centre for the Arts

तस्यापरिग्रहस्तत्रयंदृष्टिर्भवतितदाकृत्स्नदिनव्याप्तभद्राया अभावेपि एकदेशव्याप्तेःसद्भावादुपवासोनुष्ठेयः अन्यथे
यनेनैकदेशव्याप्त्यभावोपिविवक्षितः तस्मिन्पक्षेसमनंतरातीतवचनाद्दिनद्वयेप्येकभक्तंकार्यं यत्तुभद्राव्रतंसंक
ल्प्याहोरात्रमुपोषितुंनशक्नुयात् असौभद्रायुक्तघटिकासुभोजनंपरित्यजेत् भद्रारहितकालेभुक्त्वापितउपवासा
न्हीयते तथाचभविष्योत्तरेपठ्यते स्नातःसंपूज्यतामेवब्राह्मणांश्चस्वशक्तितः ततोभुंजीतराजेंद्रयावद्भद्रानदृ
श्यते अथवातेपिभद्रायाःकामतोवाग्यतःशुचिः नकिंचिद्भक्षयेत्सोपिसौयावद्भद्राप्रवर्तत इति अहश्चरमभागेय
दाभद्राप्रवेशस्तदानीमेकदेशभद्रायोगिनोदिवसस्यतद्दूनाहत्वादशाकस्यभद्राप्रवेशात्प्रागेवभोजनेप्राप्तेसत्यभु
क्तेनैवपूजादेरनुष्ठेयत्वाद्भद्रारहितेपिकालेतत्पूजादिकंनानिरूप्यते यदातुभद्रायाअंतेभुक्तेनदाकर्मकालव्याप्ति राम ५५

स्याद्भद्रोपेतकालस्यैवतत्पूजादिकंकर्तव्यम् पक्षद्वयेभद्रायुक्तघटिकासुनकिंचिद्भक्षयेत् तावतैवभद्रोपवासःपूर्य
ते वचादिकरणेषुकस्यापिविशेषस्यशास्त्रेणानुक्तत्वाद्भद्रायांल्कुप्तस्यातिक्रमेकारणाभावाच्चायमेवनिर्णयप्रकारः
सर्वोपियोजनीयः नचतिथिनक्षत्रयोगकरणानांपर्वांगानःपातितानांनिर्णयंकृत्वातदंतःपातीशास्त्रीयकर्मो
पयोगीवारःकुतउपेक्ष्यतइतिशंकनीयं अहोरात्रपरिमितत्वेनवारेसंदेहाभावात् अतएव वारस्वरूपस्यआभा
वाद्गृहीतमपयथास्थितम् तदेवंनक्षत्रयोगकरणानिनिर्णीतानि अथसंक्रांतिर्निर्णीयते तत्रसंक्रांतिर्
नाममेषादिद्वादशराशिषुक्रमेणसंचरतःसूर्यस्यपूर्वस्माद्राशेरुत्तरराशौसंक्रमणं तत्रचहोमस्नानादिकंवि
हितं तस्यचसूक्ष्मकालेअनुष्ठानासंभवात्कदानुष्ठानमतआह आसन्नत्वाद्यःसंक्रांतेःपुण्यःस्नानादिक
र्मसु तदाहदेवलः संक्रांतिसमयःसूक्ष्मोदुर्ज्ञेयःपिशितेक्षणैः तद्योगादप्यधश्चोर्ध्वंत्रिंशन्नाड्यःपवित्रताइ
ति एवंचसंक्रांतेःपूर्वंत्रिंशत्ऊर्ध्वंचत्रिंशत्घटिकाःपुण्याइतिसामान्यतउत्सर्गः तत्रापिसन्निहितानाड्यः

Indira Gandhi National
Centre for the Arts

पुण्यतमा इत्यर्थः याया: सन्निहिता नाड्यः ताश्ता पुण्यतमाः स्मृता इति स्मृवचनात् तत्र विशेषमाह वरेषु कर्क
टेषु पूर्वा मकरे विंशतिः पराः वर्त्तमाने तुलामेषे नाड्यस्तूभयतो दश ११ मेषादिद्वादशराशिषु चत्वारि त्रिकाणि
तेष्वेकस्मिंस्त्रिके क्रमेण चरस्थिरद्विभावसंज्ञा तथा च मेषकर्कतुलामकराख्याश्चत्वारश्चराः तेषु मध्ये कर्कटे
पूर्वा विंशतिर्नाड्यः पुण्याः ॰ मकरे विंशतिनाड्यः पराः पुण्याः तुलामेषयोस्तु वर्त्तमाने संक्रममाणे ऽर्वागुभय
तः पराः पूर्वाश्च दशनाड्य इत्यर्थः वृषभादौ स्थिरे पुण्याः प्राक्पश्चादपि षोडश वृषसिंहवृश्चिककुंभेषु स्थिरसं
ज्ञकेषु संक्रममाणे प्राक्पश्चादपि षोडशनाड्यः पुण्या इत्यर्थः मिथुनादौ द्विस्वभावे तु पराः षष्टिनाडिका मिथु
नकन्याधनुर्मीनानां द्विस्वभावसंज्ञा षडशीतिमुखसंज्ञा च तत्रोत्तराः षष्टिनाडिकाः पुण्या इत्यर्थः इदं चाहः सं राम
क्रमणविषयमित्याह अहः संक्रमणे रात्रौ चानुष्ठाननिषेधतः उक्तो कालो व्यवस्थाप्यो तद्वशात्पूर्वपश्चिमो
अहोरात्रि तत्र हेतुमाह रात्राविति राक्षसी सा हि कीर्तितेति मनुवचनात् रात्रिसंक्रमणे दिवा स्नात्वा नाद्य

नुष्ठानविधानाच्चेति भावः उक्तो कालो पूर्वपश्चिमो तद्वशात् विधानुसारेण व्यवस्थापनीयावित्यर्थः तथा च
अस्तमयप्रत्यासन्ने दिवासंक्रमणे सति प्रशस्तमप्युत्तरकालं तस्मात्पूर्वकाल एव ग्राह्यः एवं सूर्योदयात्प्रागेव संक्रम
णे प्रशस्तमपि पूर्वकालं तस्मात्तदुत्तरकाल एव ग्राह्यः अत्रार्थवचनानि वृद्धवशिष्ठः अतीतानागते पुण्ये द्वे उदग्दक्षि
णायने त्रिंशत्कर्कटे नाड्यो मकरे विंशतिः स्मृता इति उदगयनमतीतं सत्पुण्यं भवति दक्षिणायनमनागतं पुण्यं
विंशतिरित्यनेन त्रिंशन्नाड्यः पवित्रता इति तत्सर्गस्य मकरे अपवादः बृहस्पतिरपि वर्त्तमाने तुलामेषे नाड्यस्तूभ
यतो दशेति षडशीतिविषये वृद्धवशिष्ठः षडशीत्यामतीतायां षष्टिरुक्तास्तु नाडिका इति विष्णुपदे स एवाह पु
ण्याया विष्णुपद्यां च प्राक्पश्चादपि षोडशेति कन्यायां मिथुने मीने धनुष्यपि रवेर्गतिः षडशीतिमुखं प्रोक्तं ष
डशीतिगुणा फल इति वचनोक्ताः संक्रांतयः षडशीतिमुखसंज्ञाः वृषवृश्चिककुंभेषु सिंहे चैव यदा रविः एतद्धि

Indira Gandhi National
Centre for the Arts

१४०२

एतद्विष्णुपदं नाम विषुवादधिकं फलमिति वचनेन आम्नातं विष्णुपदं विषुवमिति तु लामेषयोः संज्ञा वृद्धवशिष्ठः
अहः संक्रमणे पुण्यमहः कृत्स्नं प्रकीर्तितं रात्रौ संक्रमणे भानोर्दिनार्द्धं स्नानदानयोः तत्र व्यवस्थामाह अ
र्द्धरात्राद् अधस्तस्मिन्मध्याह्नस्योपरि क्रिया १४ ऊर्द्ध्वं संक्रमणे भानोर्वोर्द्ध्वमुदयात्प्रहरद्वयं पूर्णे चेदर्द्धरात्रे तु
र्द्धरात्राद् अधस्तस्मिन्मध्याह्नस्योपरि क्रिया १४ ... अर्द्धरात्राद् अधस्तस्मिन्मध्याह्नस्योपरि क्रिया
यदा संक्रमते रविः १५ प्राक् दिनद्वयं पुण्यं मुक्त्वा मकरकर्कटौ अर्द्धरात्राद् अधस्तस्मिन्मध्याह्नस्योपरि क्रिया
पूर्णे चेत् कर्कटादिति वृद्धवशिष्ठवचनात् एवं च सति विष्णुपद्यां धनुर्मीनत्रयककन्यासु चैव यदा पूर्वो त्तरग
तं रात्रौ भानोः संक्रमणं भवेत् पूर्वाह्ने चैव नाड्यस्तु पुण्याः प्राक्तामनीषिभिः अपराह्णे तु पंचैव अतीतस्मात्तथक
मीणाइति वचनं तु अत्यंत प्रात्रास्त्यपरं द्रष्टव्यं एवमयनमति रिक्ते पुराविगतेषु योनिर्णयत्क्रम संपर्युदमिति एम:
मुक्त्वा मकरकर्कटावित्युक्तं तयोस्तु कथमित्याकांक्षायामाह कर्कटे मकरे रात्रावप्यावादनाप्ति तिः १६ तथा च ५१

Indira Gandhi National
Centre for the Arts